नारायणपरा वेदा देवा नारायणांगजाः ॥ नारायणपरा लोका नारायणपरा मखाः ॥ १५ ॥ नारायणपरो यो-
गो नारायणपरं तपः नारायणपरं ज्ञानं नारायणपरा गतिः ॥ १६ ॥ तस्यापि द्रष्टुरीशस्य कूटस्थस्याखि-
लात्मनः सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः ॥ १७ ॥ सत्त्वं रजस्तम इति निर्गुणस्य गुणा-
स्त्रयः स्थितिसर्गनिरोधेषु गृहीता मायया विभोः ॥ १८ ॥ कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः ॥
बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः ॥ १९ ॥ स एष भगवाँ-
ल्लिंगैस्त्रिभिरेभिरधोक्षजः स्वलक्षितग-
तिर्ब्रह्मन्सर्वेषां मम चेश्वरः ॥ २० ॥

ति निर्गुणस्यापीश्वरस्यैते त्रयो गुणा बध्नन्तीत्युत्तरेणान्वयः कथंभूताः तेनैव स्वातंत्र्येण स्थित्याद्यर्थं मायया गृ-
हीताः ॥ १८ बध्नन्ति सर्वदा मुक्तमपि मायिनं मायाविषयं पुरुषं जीवं बध्नन्ति कार्यमधिभूतं ॥ कारणमध्यात्मं
कर्ताधिदैवं तेषां भावः तत्त्वे तस्मिन् द्रव्यं महाभूतानि ज्ञानं ज्ञानदेवताः क्रिया इंद्रियाणि तदाश्रयाः ॥ तेषां
कारणभूताः तत्तदभिमानेन बध्नन्ति ॥ १९ ॥ अतः स एव स्वरूपमायः एभिर्गुणैर्जीवानामावरकैरुपाधिभिः स्वस्य

लक्षिता गतिः तत्त्वं यस्य सः हे ब्रह्मन् स्वलक्षितगतिरिति ॥

श्री भा० टी० २५

तस्याः सृष्टिप्रकारमाह॥ कालमिति कर्म जीवादृष्टं विबुभूषुः॥ विविधं भवितुमिच्छन्॥२१॥ गुणानां व्यतिकरः क्षोभः स्व
स्वभावतः परिणामो रूपान्तरापत्तिः पुरुषः ईश्वरस्तेनाधिष्ठितत्वं त्रयाणां विशेषणं॥२२॥ महतः महत्तत्त्वस्य
विकुर्वाणात् विक्रियमाणात्॥ तस्य च क्रियाज्ञानशक्तित्वात्॥ त्रिगुणत्वेऽपि रजःसत्त्वाभ्यामुपबृंहितत्वं अहंकारस्य
यकत्वात्तमःप्रधानत्वं तत्र वाहंकारकार्येषु नामसं शब्दादिकं द्रव्यं राजसं सात्त्विकं चाल्पं॥ एवं तदुपाधिके जीवे
उपचितेऽयं नामसात्त्विकं॥२३॥ तत्र विकुर्वतस्त्रैविध्यमाह॥ वैकारिकः सात्त्विकः तैजसो राजसः॥

श्लोका

कालं कर्म स्वभावं च मायेशो मायया स्वया॥ आत्मन्यदृच्छया प्राप्तं विबुभूषुरुपाददे॥२१॥ कालाद्गुणव्य
तिकरः परिणामः स्वभावतः कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत्॥२२॥ महतस्तु विकुर्वाणाद्रजःस
त्त्वोपबृंहितात्॥ तमःप्रधानस्त्वभवद्द्रव्यज्ञानक्रियात्मकः॥२३॥ सोऽहंकार इति प्रोक्तो विकुर्वन्समभूत्त्रिधा॥
वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा॥२४॥ द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो॥ तामसाद
पि भूतादेर्विकुर्वाणादभून्नभः॥२५॥ तस्य मात्रा गुणः शब्दो लिंगं यद्द्रष्टृदृश्ययोः॥२६॥ ॥ ॥

द्विधा यस्य भेदः॥२४॥ द्रव्यशक्तिरित्यादीनि त्रीणि प्रातिलोम्येन त्रयाणां लक्षणानि द्रव्ये महाभूतादौ शक्तिर्यस्य॥ क्रिया
स्विन्द्रियेषु शक्तिर्यस्य ज्ञाने देवेषु शक्तिर्यस्य हे प्रभो बोद्धुं शक्तः॥ भूतादेरिति तामसस्य विशेषणं॥ तत्र तामसान्
यन्म शब्दो भवतीति विसर्गः॥ सत्त्वं सतस्तन्तस्य नभसो मात्रा सूक्ष्मं रूपं गुणश्च साधारणो व्यावर्तको धर्मः शब्दो यस्य नभ
स्त्वापादन इत्यर्थः॥ एवमवस्थान्तरादिष्वपि द्रष्टव्यं शब्दस्य लक्षणं लिंगमिति कुड्याद्यन्तरितं तत्केनचिदुक्तं वागोरा
न्तरस्थे योगाद्द्रष्टाप्यस्त्रे तत्र दृश्यागतः तयोर्लिंगं बोधकं लिंगं विषयत्वादसन्दिग्धमत्त्व॥२५॥ ॥ ॥ ॥ १८

तत्र द्वारा ज्ञातमिति ज्ञातव्यं ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

परस्य नभसः कारणस्य तेनान्वयाच्छब्दवांश्च वायुः तस्य लक्षणं प्राणो देहधारणं ॥ ओजः सहो बलानि इंद्रियम-
नःशरीराणां पाटवानि तेषां हेतुः इत्यर्थः ॥२५॥ उदपद्यत उत्पन्नं स्वतो रूपवत्तेजः ॥ वायुनभसोः कारणभूत-
योरन्वयात्स्पर्शशब्दवच्च ॥२६॥ एवमंभसः घोषः शब्दः ॥२७॥ विशेषः पृथ्वी पृथिव्याश्च परान्वयाधिक्यात्
गुणाधिक्यं ॥२८॥ मनः चाहं तेन तदधिष्ठाता चंद्रोपि इत्यर्थः ॥ अन्ये च दश देवाः वैकारिकाः सात्त्विकाहं-

नभसोथ विकुर्वाणादभूत्स्पर्शगुणोनिलः ॥ परान्वयाच्छब्दवांश्च प्राण ओजः सहो बलं २५
वायोरपि विकुर्वाणात्कालकर्मस्वभावतः ॥ उदपद्यत तेजो वै रूपवत्स्पर्शशब्दवत् ॥२६॥ तेज-
सस्तु विकुर्वाणादासीदंभो रसात्मकं रूपवत्स्पर्शवच्चांभो घोषवच्च परान्वयात् ॥२७॥ विशे-
षस्तु विकुर्वाणादंभसो गंधवानभूत् ॥ परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः ॥२८॥ वैका-
रिकान्मनो जज्ञे देवा वैकारिका दश ॥ दिग्वातार्कप्रचेतोश्विवह्नींद्रोपेंद्रमित्रकाः ॥२९॥ तैज- ह्रीं२
सात्तु विकुर्वाणादिंद्रियाणि दशाभवन् ॥ ज्ञानशक्तिः क्रियाशक्तिः बुद्धिः प्राणश्च तैज-
सौ ॥ श्रोत्रं त्वग्घ्राणदृग्जिह्वा वाग्दोर्मेढ्रांघ्रिपायवः ३०॥ तैजसादिंद्रियभवः १

कारकार्याः ॥ तानाह दिक्च वातश्च अर्कश्च प्रचेताश्चाश्विनौ च ॥ एते पंच श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाना-
मधिष्ठातारः ॥ वह्निश्च इंद्रश्च उपेंद्रश्च मित्रश्च कश्च प्रजापतिः ॥ एते पंच वाक्पाणिपादपायूपस्थाना-
मधिष्ठातारः ॥२९॥ यतो ज्ञानशक्तिर्बुद्धिः क्रियाशक्तिः प्राणश्च तैजसाहंकारकार्यौ अन्ये ज्ञानक्रि-
याविशेषरूपाणींद्रियाणि एवमपि तेन तस्मादभवन्नित्यर्थः ॥३०॥ तान्याह श्रोत्रमिति दोः पाणिर्मेढ्र उपस्थः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा० टी० १८

एवं कारणसृष्टिमुक्त्वा कार्यसृष्टिमाह यदा एते असंगताः अमिलिता आयतन ॥ आयतनं एव यदर्थं आगतं तस्य स्थानस्य शरीरस्य
निर्माणेन शेकुः ३२ ॥ तदा संहत्य अन्योन्यगुणप्रधानभावेनोपादाय स्वीकृत्य उभयं समष्टिव्यष्ट्यात्मकं शरीरं ॥ ३३ ॥ कालकर्मस्वभा
वान् अधिष्ठाय स्थितः ॥ जीवयतीति जीवः परमात्मा अजीवं अचेतनं अजीवयत् चेतयति स्म ३४ ॥ निर्भिद्य पृथक्कृत्य स्थि
त इत्यर्थः ॥ ३५ ॥ तदवयवैर्लोकान् रचनामात्र यस्येति कट्यादिभिः कटिमूलयोः पश्चाद्भागः जघनं पुरोभागः अधः सप्त
लोकान् अतलादीन् ऊर्ध्वं भूरादीन् सप्त ॥ ३६ ॥ वर्णानां तत उत्पत्तिं दर्शयति पुरुषस्येति ॥ ब्रह्म ब्राह्मणः मुखमिति का

मजीव ३

यदैतेऽसंगता भावा भूतेन्द्रियमनोगुणाः ॥ यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम ॥ ३२ ॥ तदा संहत्य चान्यो
न्यं भगवच्छक्तिचोदिताः ॥ सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः ॥ ३३ ॥ वर्षपूगसहस्रान्ते तदण्डमुदके शयं ॥
कालकर्मस्वभावस्थो जीवोऽजीवमजीवयत् ॥ ३४ ॥ स एव पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः ॥ सहस्रोर्वङ्घ्रिबा
ह्वक्षः सहस्राननशीर्षवान् ॥ ३५ ॥ यस्येहावयवैर्लोकान्कल्पयन्ति मनीषिणः ॥ कट्यादिभिरधः सप्त
सप्तोर्ध्वं जघनादिभिः ॥ ३६ ॥ पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः ॥ ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रो व्यजा
यत ॥ ३७ ॥ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ॥ हृदा स्वर्लोक उरसा महर्लोको महात्मनः
३८ ॥ ग्रीवायां जनलोकोऽस्य तपोलोकः स्तनद्वयात् ॥ मूर्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः ३९

दुर्वीय नृ

एकार्णवाद्योरभेदविवक्षयोक्तं बाहवः इति वक्ष्यते तु त्रिषु ॥ ३७ ॥ इदानीमुपासनार्थं लोककल्पनाभेदान्सप्तलोकपक्ष
माह द्वाभ्यां भूर्लोकः पातालमारभ्य पद्भ्यां कटिपर्यन्ताभ्यां स्तनद्वयादिति उपासनार्थत्वात् अधोधो भागे ऊर्ध्वोर्ध्वपर्यवसानेन
दोषः यद्वा स्तनतः प्राक् ऊर्ध्वं यदा इत्यस्मादित्यर्थः ब्रह्मलोको वैकुण्ठाख्यः सनातनः नित्यः न तु सृज्यप्रपंचा

॥ २५ ॥ [illegible] १८

इदानीं वानंदस्य लोकपदं तं दर्शयति तत्र जघनादिभिः भूरादयः पूर्वोक्ता एव सप्त कट्यादिभिः अथ सप्त लोकानाह तलकट्यामिति द्वा
भ्यां पृथग्द्विभक्तनिवासवान् ॥४१॥ त्रिलोकपक्षमाह भूर्लोकः पातालादिसहितः ॥४२॥ इति श्रीभा॰ द्वितीये पंचमे ५ ॥
विराट्विभूतिस्त्वग्रोक्ता अथामादिभेदतः दृढीकृतं च पूर्वोक्तं सर्वं पुरुषस्य ॥ इदानीं वैराजस्य विभूतिः सप्रपंचं वर्ण्यते
वाचामस्मदादिवागिंद्रियाणां तदधिष्ठातुर्वह्नेश्च तत्स्थानं वेदानां तत्स्थानं छंदसां गायत्र्यादीनां सप्तानां तस्य सप्त धातवः ॥

वं१

तत्कट्यां चातलं क्लृप्तमूरुभ्यां वितलं विभोः जानुभ्यां सुतलं शुद्धं जंघाभ्यां तु तलातलं ॥४१॥ महातलं तु गुल्फाभ्यां प्रपदा
भ्यां रसातलं पातालं पादतलत इति लोकमयः पुमान् ॥४२॥ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः स्वर्लोकः
कल्पितो मूर्ध्ना इति वा लोककल्पना ॥४२॥ इति श्रीभागवते द्वितीये पंचमोऽध्यायः ॥५॥ ब्रह्मोवाच वाचां वह्नेर्मुखं
क्षेत्रं छंदसां सप्त धातवः ॥ हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च ॥१॥ सर्वासूनां च वायोश्च तन्नासे परमायने ॥
अश्विनोरोषधीनां च घ्राणो मोदप्रमोदयोः ॥१॥ रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी कर्णौ दिशां च तीर्थानां
श्रोत्रमाकाशशब्दयोः ॥ तद्गात्रं वस्तुसाराणां सौभगस्य च भाजनं ॥२॥

एतस्य २

गादयः क्षेत्रं ॥ हव्यं देवानामन्नं कव्यं पितॄणाममृतं तदुभयशेषो मनुष्याणां तेषां मन्त्राणां सर्वरसस्य मधुरादेः बहिर्यस्य
गादयः क्षेत्रं तदधिष्ठानं जिह्वा देवो ऽन्यतिस्थानं एव सर्वेषां नाभ्युत्तरेषां सवस्तूनामस्मदादिप्रा
बलानां ... स्मदादिरसनेंद्रियस्य तदधिष्ठातुर्वरुणस्य जिह्वादेवोऽन्यतिस्थानं एवं सर्वेषां पञ्चवृत्तीनां ... नामस्मदादीनां
वकावादस्मदादिरसनेंद्रियस्य तदधिष्ठानुर्वरुणाख्यं जिह्वा देवो ऽन्यतिस्थानं एवं सर्वत्र ...
प्राणानां तस्य नासिका सा चेच परमायने ॥ उत्तमे क्षेत्रे मोदयोश्च सामान्यविशेषगंधयोर्घ्राणेंद्रियं परमायनं ॥ तेजसां रूप
प्राणानां तस्य नासिका सावंगपरमायने ऽश्विनोरोषध्योश्च सामान्यविशेषगंधयोर्घ्राणः परमायनं ॥ तेजसां रूप
ग्राहकाणामस्मदादिचक्षुरिंद्रियरूपाणां नीलपीतादीनां प्रातिणीनेत्रगोलके सर्वेषां स्वस्व नानात्वं मानंतत्रदृष्टव्यं कर्णौ श्रो
काशानां चक्षुरिंद्रियं रूपाणां नीलपीतादीनां प्रतिणीनेत्रगोलके सर्वे तत्र संतानां पृथमानं तत्र द्रष्टव्यं कर्णौ श्रो ॥
त्राधिष्ठानं श्रोत्रमिंद्रियं तस्य गात्रं शरीरं वस्तूनां यसारा शाः तेषां भाजनं स्थानं २ ॥

मोदप्र२

द्वि॰ ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ईशस्यकेशान्विदुरंबुवाहान्इत्यत्र।।८

अस्यानेकस्यपीश्वरायोप्यन्वर्थः सर्वस्यमेधस्ययज्ञस्यउद्भिज्जातीनां सर्ववृक्षाणां येवृक्षैर्यज्ञः सम्यक्साधितः तेषामेववा ॥४॥ के
शानामेघानां देवेष्वर्वं तयोः केः समस्तूणिविघ्ननोपादकावनखानि शिलानालोहानामिनिसारस्वर्णं हूहदेन मकर्मणापालनकर्
णं ॥५॥ विक्रमः पदन्यासो भूरादिलोकानामास्पदमाश्रयः भूरादिशब्दानामव्ययत्वात् षष्ठ्यालुक् देनेमोत्तब्ध्यवदेणशारणं
भयाद्दत्तणं सर्वेषां कामानां वरस्यवरस्यापि हदेवंब्रिरास्यदे ॥६॥ वीर्यस्य शुक्रस्यापि शिश्नोपस्थे धिष्ठानउपस्थ लिंगेन्द्रियं प्रजार्यमानंद

मेघ विद्युत शिला

त्वगर्भस्यस्यर्शवायोश्चसर्वमेधस्यवैवदि ॥ रोमाण्युद्भिज्जातीनां येर्वायज्ञस्तुसंभृतः ॥४॥ केशाभ्रस्तनयित्नवोऽस्थिशि
लालोहाश्चविघ्ननोः ॥ बाहवो लोकपालानां प्रायशः क्षेमकर्मणां ॥५॥ विक्रमो भूर्भुवः स्वश्च क्षेमस्य शरणस्यच
सर्वकामवरस्यापि हरेश्चरणआस्पदं ॥६॥ अपां सर्गस्य वीर्यस्य पर्जन्यस्य प्रजापतेः ॥ पुंसः शिश्न उपस्थस्तु प्रजात्या
नंदनिर्वृतेः ॥७॥ पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद ॥ हिंसाया निरृतेर्मृत्योर्निरयस्य गुदः स्मृतः ॥८॥ पराभू
तेरधर्मस्य तमसश्चापि पश्चिमः ॥ नाड्यो नदनदीनां तु गोत्राणामस्थिसंहतिः ॥९॥ अव्यक्तरससिंधूनां भूतानां निधन
स्यच ॥ उदरं विदितं पुंसो हृदयं मनसः पदं ॥१०॥ धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च ॥ विज्ञानस्य च सत्वस्य परस्या
त्मा परायणम् ॥११॥

संतानार्थसंभोगाह्लैन निर्वृतिः तापहानिः तस्याः ॥७॥ परिमोक्षस्य मलत्यागस्य पायुरिंद्रियं गुदः स्थानं निरृतेरलक्ष्म्याः
८॥ तमसोऽज्ञानस्य पश्चिमः पृष्ठभागः गोत्राणां गिरीणां अस्थिसंघातः ॥९॥ अव्यक्तं प्रधानं रसः अन्नादिसारः ॥ सिंधवः
समुद्रास्तेषां निधनस्य लयस्य उदरं पदं स्थानं विदितं ज्ञातं विज्ञैः मनसः अस्मदादि लिंगशरीरस्य ॥१०॥ तुभ्यं तव कुमारा
णां सनकादीनां भवस्य रुद्रस्य आत्मा चित्तं परमायणं ॥ ८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवं तावत्परमेश्वराज्जातं विश्वं ततो न भिन्नं यथा कुंडलं सुवर्णान्न पृथक् ॥ अत्र सन्नत्सर्वनियंता सर्वप्रकाशकोनि
यमुक्त इत्यर्थाद् उक्तं एतदेव पुरुषसूक्तार्थकथनेन दृढयति ॥ तत्र सहस्रशीर्षेत्यर्द्धस्य ब्राह्मणोस्य मुखमा
सीदित्यादि च ऋक्त्रयस्यार्थः पूर्वाध्याय एव दर्शितः पुरुष एवेदं सर्वमित्यस्यार्थं दर्शयति अहं भवानिति सार्द्धैस्त्रि
भिः ते अग्रजा इमे सनकादयः मरीच्यादयश्च ॥११॥ जलं च स्थलं च नभश्च ओकांसि येषां ते जलस्थलनभौकस इ
तिसंधिरार्षः सर्वं पुरुष एव न ततः पृथगित्यर्थः ॥१३॥ प्रपंचेन तस्यापरिच्छेदं वक्तुं स भूमिमित्यस्यार्थमाह ते

अहं भवान्भवश्चैव त इमे मुनयोऽग्रजाः । सुरासुरनरा नागाः खगा मृगसरीसृपाः ॥११॥ गंधर्वाप्सर
सो यक्षा रक्षोभूतगणोरगाः । पशवः पितरः सिद्धा विद्याध्राश्चारणा द्रुमाः ॥१२॥ अन्ये च विविधा जी
वा जलस्थलनभौकसः । ग्रहर्क्षकेतवस्तारास्तडितः स्तनयित्नवः ॥१३॥ सर्वं पुरुष एवेदं भूतं
भव्यं भवच्च यत् । तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति ॥१४॥ स्वधिष्ण्यं प्रतपन्प्राणो बहिश्च प्रतप
त्यसौ । एवं विराजं प्रतपंस्तपत्यंतर्बहिः पुमान् ॥१५॥ सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात् ॥१६॥

न पुरुषेण विश्वमिति भूमिपदस्यार्थः वितस्तिमिति दशांगुलपदस्य अधीत्यस्त्रिपाद्ब्रह्मस्य च वितस्तिमधिकं
व्याप्य तिष्ठति ॥ आधिकामात्रं विवक्षितं न प्रमाणं अनुपयोगादपरिच्छिन्नता अत्र तत्र दृष्टान्तमाह यथेति अ
सौ प्राणाख्य आदित्यः ॥ असौ वा आदित्यः प्राण इति श्रुतेः स्वधिष्ण्यं मंडलं प्रकाशयन् यथा बहिश्च प्रकाशयति
एवं विराड्देहं प्रकाशयन् स्वात्मंतर्बहिश्च प्रकाशयति ॥१५॥ नित्यमुक्तत्वं दर्शयितुं उत्तामृतत्वस्येत्यस्या
र्थमाह स इति अभयस्येति मंत्रगतामृतपदव्याख्या अन्नेनेति पदं विभक्तिव्यत्ययेन व्याचष्टे मर्त्यं मरणध
र्मकमन्नं कर्मफलं यस्मादत्यगात् ॥ अतिक्रांतवान् अतो न केवलं सर्वात्मकः किंतु स्वतंत्रस्यापीश्वर इत्यर्थः १९

स्यतिज्ञानंद १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा० दि०
टी०
१९

लोकेषु ५

नन्वप्रपंचात्मकस्य कुतो नित्यमुक्तत्वमित्याशंक्यानन्यादिदाताय एतावानस्येत्यर्थमाह ॥ महिमेति प्रपंचात्मकस्यापि प्रभूते
शावमित्येष महिमाऽत्ययः प्रपातः प्रपंचात्मनभिभूतत्वादिति भावः । मंत्रेणाच एतावानस्य महिमा विभूतेः ...नुज्यायाश्च
पूरुषः इतिवदतायमेवार्थ उक्तः तदेवमीश्वरो नित्यमुक्त इत्युक्तं तदाश्रितानां च धर्मो तौ व्यवस्थयेति दर्शयन् ॥ पादोस्यवि
श्वाभूतानीत्यस्यार्थमाह पादेष्विति निश्चेत्यत्रेति स्थितेन यो भूरादिलोकाः ते पादा इव पादाश्चपूर्णाः यस्यसः स्थितिपात्रा
स्यपादेषु सर्वाणि भूतेषु सर्वान् जीवान् विदुः मंत्रे तु पादोस्यविश्वाभूतानि इति सामानाधिकरण्यमधिष्ठानाधिष्ठेया
भेदविवक्षया पाद इत्येकवचनं च सामान्याभिप्रायेणेति व्याख्यातं भवति ॥१७॥ मुक्तिप्रफलत्वेन वैचित्र्यं दर्शयन् त्रिपादस्यामृ
तं दिवीत्यस्यार्थमाह अमृतमित्यर्धेन त्रिपादमृतं नित्यसुखं दिवि दिक्षूर्ध्वं लोकेषु न त्रिलोक्यामित्यर्थः तदेवं त्रिपा।

महिमैष ततो ब्रह्मन्पूरुषस्य दुरत्ययः पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः ॥ १७ ॥ अ
मृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्धसु ॥ पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः ॥ १८

महर्लोकस्य क्रममुक्तिस्थानत्वेपि कल्पांते तत्रस्थानां स्थानत्यागान्नाऽवनाशि सुखं जनलोके त्वस्ति तत्र मविनाशि सुखं ।२।

च्छेदोक्तं वैचित्र्यं दर्शयन्नाह ॥ त्रयाणां लोकानां मूर्धसु महर्लोकः तस्य मूर्धानस्तदुपरितना लोकाः ॥ तेषु यथाक्रमं
अमृतादिकं प्रधायि निहितं तत्र त्रिलोक्यां न श्रवत्येव सुखं यावज्जीवं स्वस्थानापातित्यागात् ॥ किंतु महर्लोकवासि
नो कल्पांते त्रिलोकदाहोष्मपीडितानां तदा तत्रागमनात् क्षेमदर्शनमस्ति तपोलोके तस्य दाहस्याभावात् क्षेमम
वचदपि तिष्ठि ॥ त्रिलोक्यां दह्यमानायां शक्त्या संकर्षणाग्निना यांत्यूष्मणा महर्लोकाज्जनं भृग्वादयोर्दिताः इति सत्य
लोके त्वभयं मोक्षमनप्त्या सतेः एतदेवं वैचित्र्यमधिकारिभेदेनोपपादयन् त्रिपादूर्ध्व इत्यस्यार्थमाह ॥ न प्रजायंते पु
त्रादिरूपेण अन्यप्रजाः नैष्ठिकब्रह्मचारिवानप्रस्थयतयः तेषामाश्रमास्त्रिलोक्यां बहिरासन् ॥१८॥१॥ ॥ _॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गृहे मेधस्त्वं नः यस्माद् गृहद्धृतः ब्रह्मकर्मब्रह्मचाहितः अयं वापि कायभेदेप कस्यैवा वस्थाभेदेन न तत्त्वं न तभिन्नविषय
इति दर्शयं स्तनो विश्वरूपं त्वस्यार्थमाह ॥ विविधं सुरूपं च नीतिविश्वरूपः पुरुषः देवजः स्तनीमार्गो दाक्षिणा हुपोविव
क्रमे च त्वान्तिस्मकं संभूतैस्माशनानशने भोगापवर्गप्राप्तिसाधनभूते अत्र देहेन वेन पुनर्विशेषणं ॥ २५ ॥ यत् यदीविद्याव ॥ अविद्याकर्मरूपा एका २
स्तो २ तन्मा धनोपासनारूपत्वात् देवेविराट् तदवर्तिनां फलवैविध्यमुक्तं तत्कारणस्य वस्यतत्रैव लक्षणं दर्शयितुं तस्मा
द्विराड् जायेते त्यस्यार्थमाह ॥ यस्माद् देहजन्ते न च भूतेन्द्रियगुणात्मको विराट् चेजते स्तं द्रूपः ॥ २६ ॥ तद्विष्वं विराट्
अत्यगाद् ६ देहं दृश्यं इत्वं तिक्रान्तवान् सर्वं इदं देवतिर्यङ्मनुष्यादिकं ॥ नन्वेवं पुरुषस्य एव चेत्सर्वं तदिन्द्रियज्ञस्य तत्साधनानां च एः

श्रुतं त्रिलोकाख्यत्वमयोगृहमेधोपि ब्रह्मद्वतः स्तनीविव क्रमेविश्वं क्राशनानशने उभे ॥ २७ ॥ यदीविद्याचवि
याच पुरुषस्तस्मयापश्वयः यस्माद् देहविराट् जज्ञे भूतेन्द्रियगुणात्मकं ॥ २८ ॥ तद्व्यमन्यगाद्विष्वंगोभिः सर्वदे ॥ संभारेषु साध्येषु २
वानयज्ञ यदास्यनाम्या ज्वलिता देहमासमद्यात्मनः ॥ २९ ॥ नाविंदयज्ञसंभारान् पुरुषावयवादृते तेषु यत्र
स्यपशवः सवनस्पतयः कुशाः ॥ ३० ॥ इदं च देवयजनं कालश्चोरुगुणान्वितः वस्तूनि औषधयः स्नेहादयस्ता
हस्मृदोजते ॥ ३१ ॥

स्तो भवान् यज्ञेः पुरुषावयवं नमिस्तो दित्याग्रंकयतत्त्वविहावायावन्मुख रूपे गाह विधेन्यादिमं त्यार्थं संगृह्य दर्शी
यति यदेन्यादिनाय स्यति विराट् तयोमिमाप स्येव प्रकृतत्वात् ॥ नाभो भवन्नास्यं तस्मात् ॥ २९ ॥ यज्ञसंभारान् मार्थ्या ॥ नाति २
नाय यपनदाने षु संभारेषु सा ध्येषु सत्सु पुरुषावयवैर्वेनसंभाराः संभृता इति चतुर्थेनान्वयः वनस्पतयो यूपाः ॥ तानाद २
३२ देवयजनं यज्ञभूमिः इदं चेति वचनाद् ज्ञातार्दिस्यानेड यविष्टः कयपतीनिगमयनेव ऋगुणान्वितो वसंतादि
कालाः वस्तूनि पात्रा दीनि दोषधयो व्रीह्यादयः स्नेहाघृतादयः रसा मधुरादयः स्वर्णादीनि लोहानि मृद
श्च ३३ ॥

चातुर्होत्रं हौत्रादिकं कर्म नामधेयानि ज्योतिष्टोमादीनि क्रमादीनामक्रमत्वात् मंत्रा इति स्वाहाकारादयः ॥२४॥ देवताना
मनुक्रमः उद्देशः कल्पो बौधायनादिकं पद्धतिग्रंथः ग्रंनेनाद्यपत्या इति संकल्पः तंत्रमनुष्ठानप्रकारः गतयो लि
ङ्गाद्याः मतयो देवताध्यानानि कृतस्य भगवति समर्पणं संभृताः संपादिताः संभारा येन ॥२५॥ सोहं तेनैव यज्ञेनैव यज्ञे
श्वरमयजमिति मन्त्रार्थः सूचितः ॥२६॥ तेनेदं वाश्रयजंतेत्यस्यार्थं सप्रपंचं दर्शयन्निति तत इतिहास्यां त्वमेकं इत्यादिरूपेण
... ... सर्वमिदं स्वतन्त्रेन पुरुषं जातमग्रत इत्यस्यार्थो दर्शितः ॥२७॥ कालस्वावसरे ॥२८॥ यदधिष्ठानमित्य
न्यूनोऽतिरिक्तपदं संवदतिनारायणे ... लिङ्गाहितमधि ... तं भगवन्तं हेतुः सत्त्वादिगुणाः सर्गादौ गृहीता नामायया उऽय
आयो यजूंषि सामानि चातुर्होत्रं च सत्तम ॥ नामधेयानि मंत्राश्च दक्षिणाश्च व्रतानि च ॥२४॥ देवतानुक्रमः कल्पः संक
ल्पस्तन्त्रमेव च ॥ गतयो मतयश्चैव प्रायश्चित्तं समर्पणं ॥२५॥ पुरुषावयवैरेते संभाराः संभृता मया ॥ इति संभृतसं
भारः पुरुषावयवैरहं ॥ तमेवं पुरुषं यज्ञं तेनैवायजमीश्वरं ॥२६॥ ततस्ते भ्रातर इमे प्रजानां पतयो नव ॥ अयजन्व्यक्त
मव्यक्तं पुरुषं सुसमाहिताः ॥२७॥ ततश्च मनवः काले ईजिरे ऋषयोऽपरे ॥ पितरो विबुधा दैत्या मनुष्याः क्रतु
भिर्विभुं ॥२८॥ नारायणे भगवति तदिदं विश्वमाहितं ॥ गृहीतमायोरुगुणः सर्गादावगुणः स्वतः ॥२९॥ सृजा
मि तन्नियुक्तोऽहं हरो हरति तद्वशः ॥ विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥३०॥ इति तेऽभिहितं तात यथेदम
नुपृच्छसि ॥ नान्यद्भगवतः किंचिद्भाव्यं सदसदात्मकं ॥३१॥ न भारती मेऽङ्ग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो
मृषा गतिः ... ॥३२॥ यन्नयं तत्त्वमित्यनन्यथा ... भगवान्सर्वेषामेव पूर्वजः इति तद्व्यवहरति ... सत्त्वामी
तिपाठे स्वयमेव वक्तेत्यादि ... विश्वमिति पुरुषरूपेणाविस्त्वरूपेणात्रिशक्तिर्मायादीनां धायतीति तथा सः ॥३०॥ यद्वेदं विश्वंय
दाद्यकः स्वमिव मित्येवमादिसर्वेषु भगवानेवात्मा नान्योऽस्तीत्यर्थः ... देवान्यदेवानन्यो योऽस्तीत्येतदिति पुरु
षरूपेणैव सर्वमिति स्पष्टत्वाच्च यदुक्तं तेन तद्व्यवहरति ॥ इतीति कार्यकारणात्मकं भाव्यं सद्भगवतः सकाशादन्यान्न
प्रकृतं भवतीत्यभिहितं ॥३१॥ यदुक्तं प्रतावन्तं यतो हि मितमविज्ञाय मामीश्वरं प्रवीषितद्व्यपायोपसंहरतीति भारतीति य

श्रुत्वा स्वानुभवमेवान्वयव्यतिरेकाभ्यां प्रमाणयति द्वाभ्यां सोऽहं समाम्नायादिभिस्सर्वैः कष्टोपियोगमाश्रित्यापि
यत आत्मानो मम संबीजमात्मनेव न ज्ञातवान् कुतोऽन्यस्य वार्ता एतत् त्वन्तनीयस्कंधेवव्यतिपश्येद्वे ॥ २३ ॥ तदा समी
पुण्यं श्रीशरणागतानां संसारनिवर्तकं मंगलाद्वैतसुमेव्यं च तस्य चरणं नतो ऽस्मि ततो चिंत्यमहिमत्वेन ज्ञान
वानस्मीति केमुत्यन्त्या [illegible] येनाहं यादीतिस्वमायया विस्तारयंयः स्वयमपि प्रयोगात् परिशुद्धो निषेधपरतावा
निति [illegible] वर्तनवानित्यर्थः अपरे तु तोज्ञानीयुः तस्य श्रीमद्गुरुमच्चरणं ततो ऽस्मीति पूर्वेणास्संबंधः

सोऽहं समाम्नायमयस्तपोमयः प्रजापतीनामभिवंदितः पतिः आस्थाय योगं निपुणं समाहितस्ता
न्नाध्यगच्छं यत आत्मसंभवः ॥ २३ ॥ नतोस्म्यहं तच्चरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमंगलं योह्यात्म
मायाविभवं स्म पर्यगाद्यथा नभः स्वांतमथापरे कुतः ॥ २४ ॥ नाहं न यूयं यदृतां गतिं विदुर्न वामदेवः
किमुतापरे सुराः ॥ तन्मायया मोहितबुद्धयस्त्विदं विनिर्मितं चात्मसमं विचक्ष्महे ॥ २५ ॥ यस्यावता
रकर्माणि गायंति ह्यस्मदादयः न यं विदंति तत्त्वेन तस्मै भगवते नमः ॥ २६ ॥ स एष आद्यः पुरुषः क
ल्पे कल्पे सृजत्यजः आत्माऽऽत्मन्यात्मनाऽऽत्मानं संयच्छति च पाति च ॥ २७ ॥

ननु सर्वज्ञः कथं न जानाति अप्रमेयभावादित्याह सोहमपि यदंतं नावैमि तद्वयाः ननु सर्वे वर्णाश्रमादिषु निष्ठायै स्वा
श्रयत्न एवमेवाप्ता अन्योगवेद यदि वा न वेदेति ॥ २४ ॥ एतत् प्रपंचयति नाहमिति द्वाभ्यां वामदेवो रुद्रः यस्य श्रीवि
मोहितं मायाविभवं परमा[illegible] रूपो किं विदंत्य पृथक् स्वमायया विचक्ष्महे वियः ॥ तदपि आत्मसमं स्वज्ञानानुरूपमेव न तु
यथा स्थितं मायानिपरमा[illegible] यं रूपो किं विदंत्य पृथक् ॥ २५ ॥ ननु सर्वेऽपि ते वर्णयंति नाह यं ते न तद् आह यस्येति ॥ २६ ॥ अ
कृतं मोहितबुद्धयः त्वमेव तज्ज्ञानेन प्रपंचज्ञानेऽहेतुः २५ ॥ ननु सर्वेऽपि ते वर्णयंतीत्याह यस्येति ॥ आत्मन्यात्मानं
वनाधकर्माणि संदर्पणादिषु यति स एष आद्यः श्रीभगवान्पुरुषः सर्वजगत् सन् स्वदेहादिकं सृजति ॥ आत्मानं आत्मनि
निर्गुणैक गुणास्थानं कर्मवत्स्वरूपमेवेत्यर्थः पुरुषावतारः स्रष्टादीनि कर्माणि निःसंदेह पेशलानि ॥ २७ ॥

तेनाह यथा स्वर्यांतं
नभो नाप्नोति तद्वत् न
हि स्वबुध्या दर्शनं
वित्राचंति हंतीत्रिभा
वः तथा च वक्ष्यति
युत्तय एव ते नय
युरंतमनंततया॥
॥

नात्मान

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्वा॰ देव४ व॰

श्री भा॰ टी॰ २१

नयं विदंतीति तत्त्वतोन्यत्कं किं नमित्तापेक्षया मायामाह सत्यज्ञानं केवलमात्यंतिकं तच्च दायाकारवृत्तिज्ञानव्यंजकं दार्थविशे षणानि विशुद्ध विषयाकारशून्यं यतः प्रत्यक्समवांतं सम्यगेव सम्यक् सदेहादिवहितमवस्थितं यतो निर्गुणमगुणकार्यं दिग्व्यतिरेकेण केवलं सुवर्नियप्यपि वृत्ति ज्ञानमपि स्वरूपज्ञानमेवेति नित्यत्वाद्ययात्त्वत्याद्दिदोषप्रसक्तं तथा प्यंतःकरणवृत्तिदोषैर्न घाभवतीति विच्छिद्यते एभिर्विशेषणैः सत्यत्वमपि समर्थितं किं वपुर्हि दिया वज्रदश तंदृष्ट्वेत्वा स्वजन्मादयः षड्विकारा संनीत्याद अनाद्यंतं जन्मनाशरहितं तत एव जन्मा नवाक्षित्व पलक्षणं वि कारा येना शिवृद्धि परिणामादि तपयाक्षनत्वे नियतः पूर्णं सर्वदेहेषु नित्यमकृत्यनित्यं सर्वदाहेतु प्रतीतिसम यो पि परमार्थतोद्वयमिति ३९ अवि इदनुभवेत्र ना तत्र ते निहृत्य केनावदस्य शांतात्मेंद्रियाशया दृ मनोदेहेंद्रियमनसो

विशुद्धं केवलं ज्ञानं प्रत्यक्सम्यगवस्थितं सत्यं पूर्णमनाद्यंतं निर्गुणं नित्यमद्वयं ३९ ऋषे विदंति मुनयः प्रशांतात्मेंद्रियाशयाः यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतं ४० आद्योवतारः पुरुषः परस्य कालः स्वभा
ई२ वः सदसन्मनश्च द्रव्यं विकारो गुणइंद्रियाणि विराट्स्वराट् स्थास्नु चरिष्णु भूम्नः ४१ अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च स्वर्लोकपालाः खगलोकपाला नृलोकपालास्तललोकपालाः ४२

यदा भवंतीति तदा न विदंतीति प्रत्युदाहृत ज्ञाने कारणमाह यदा तु तदेव प्रकाशमानमेवं मनोनंतकैर्विप्लुतं स्यात्तदा। तिरोधीयेतेति ४० अवताराविस्तरेणाह आद्य इत्यादि यावत्समाप्तिपरस्य भूम्नः पुरुषः प्रकृतिप्रवर्तकः यस्य श्री महापुरुषस्य सहस्रशीर्षेत्युक्तो लीलाविग्रहः स आद्योवतारो वक्ष्यति हि भूते पदार्थेव भगवान् पूर्वं विराजं वि सृज्य तस्मिन् स्वांशेन विष्टः पुरुषाभिधानमवापेति नारायणस्यादिदेवः यथो क्तं विष्णोस्तु त्रीणि रूपाणि पुरुषाख्या न्यथो विदुः प्रथमं महतः स्रष्टृ द्वितीयं त्वंडसंस्थितं तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यत इति ४१ यद्यपि सर्वेषामवि शेषेणावतारत्वमुच्यते तथापि कालस्वभावसदसदिति कार्यकारणात्मिका प्रकृतिरुक्ता कालः मनआदीनि कर्माणि बलादयो गुणा वनावाट् वाद्यादयो विभूतयः इति विविक्तव्यमनो महत्तत्त्वं द्रव्यं महाभूतानि कर्मा त्र नविविधानि विकारो हंकारः गुणाः सत्त्वादिविराट्समष्टिशरीरं स्वराट् वैराजः स्थास्नु स्थावरं चरिष्णु जंगमं च व्यष्टिशरीरं २१

तथा४

कां४ ज्ञानलक्षणं४।

नारद पंचरात्रे,४

अथवा किंवा बहु नात्र हे एवं अहं ब्रह्मा भवो रुद्रः यज्ञो विष्णुः॥

गंधर्वादीनामीशाः यक्षादीनां नाथाः रक्षोरगेति संधिरार्षः ऋषीणां पितॄणां च श्रेष्ठाः दैत्यादीनामधीशाः
किं बहुना यत्किंचिद्भगवदादि तत्सर्वं परमेव तत्त्वमित्यन्वयः भगवत ऐश्वर्ययुक्तं महस्वत्तेजोयुक्तं ॥ ओजः स
हस्वीद्रियमनःशक्तीयुक्तं बलं देहशक्तिः श्रीः शोभा ह्रीः कर्मजुगुप्सा विभूतिः संपत्तिः आत्मा बुद्धिः त
द्युक्तं अद्भुतो वर्णः यस्य तत्तथा आश्चर्यवर्णमित्यर्थः रूपमेव स्वरूपं रूपवत् ॥ सर्वं तु यत्तत्सर्वं तत्त्वं
विभूतिरित्यर्थः ॥४४॥ सुखेन स्मर्तुमवतारानन्वक्रमन्नाह ॥ प्राधान्यत इति यस्त्वत्कथा स्मर्तव्या कर्णयोः कषायाः

गंधर्वविद्याधरचारणेशा ये यक्षरक्षोरगनागनाथाः ॥ ये वा ऋषीणामृषभाः पितॄणां दैत्येन्द्रसि
द्धेश्वरदानवेन्द्राः ॥ अन्ये च ये प्रेतपिशाचभूतकूष्माण्डयादोमृगपक्ष्यधीशाः ॥ ४३ ॥ यत्किंच लोके
भगवन्महस्वदोजःसहस्वद्बलवत्क्षमावत् ॥ श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं परं रूपवदस्व
रूपं ४४ प्राधान्यतो यानृष आमनन्ति लीलावतारान्पुरुषस्य भूम्नः ॥ आपीयतां कर्णकषाय
शोषाननुक्रमिष्ये त इमान्सुपेशान् ॥ ४५ ॥ इति श्रीभागवते द्वितीयस्कंधे षष्ठोऽध्यायः ॥ ब्रह्मो
वाच यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत्क्रौडीं तनुं सकलयज्ञमयीमनंतः ॥ अंतर्महार्णव
उपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव वज्रधरो ददार ॥ १ ॥

मलाः तान् शोषयंतीति तथा तान् सुपेशान् सुंदरान् सकारलोपस्त्वार्षः हे नारदैते तुभ्यमनुक्रमिष्ये तदनुक्रम
णमुक्तं तेनापापीयतामित्यर्थः यद्वा आपीयतामिति यान् त्वं तं श्रोतुमिच्छसि कर्णकषायशोषानित्यर्थः ॥ ४५ ॥ इ
ति द्वितीये षष्ठः ॥ सप्तमे भगवल्लीलावतारा ब्रह्मणोदिताः नारदायानुतत्कर्मश्रवणे नन्दगुणाः स हेय
यत्र यदा क्षितितलोद्धरणाय बिभ्रत् यस्मिन्नुद्यतः अनंतः तदा तं दिरणाक्षं दंष्ट्रया ददार

दंष्ट्रयाद्रिमिव ... यद्यपि ... विरोधः यद्वा
तैर्वं ... ॥१॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सूनुः सुयज्ञो नामयज्ञः १॥

श्रीभा टी. २२

यज्ञावतारमाह रुचेः प्रजापतेः सकाशादाकूत्यां प्राक् जातः स च स्वभार्यायां दक्षिणायां सुयमान् देवानजनयत् स एवेंद्रः
सन् ... यदा त्रार्तिमहरत्तदा पूर्वं सुयज्ञ इत्युक्तोपि पश्चात् मनुना मातामहेन हरिरित्युक्तः । अनेन देवा-
त्याद्यंते लोकत्रयार्तिहरणं च नमस्य कर्म दर्शितं एवं सर्वेष्ववतारेषु तत्तत्कर्म वक्तव्यं ॥ कपिलावतारमाह कर्दमप्रजा-
पतेर्गृहे तद्भार्यायां देवहूत्यां नवभिः स्त्रीभिर्भगिनीभिः सह स च स्वमात्रे आत्मगतिं ब्रह्मविद्यां ऊचेवान् ययात्म-
नः आत्मनः शमलं मलिनीकरणं गुणसंगरूपं पंकमस्मिन्नेव जन्मनि विधूय कपिलस्य गतिं मुक्तिं प्राप्तवती
॥२॥ दत्तात्रेयावतारमाह ॥ मयाहमेव दत्तस्त्वं दत्त इति यद्यत्प्राह ततः स नाम्ना दत्तो जातः स्वभक्तेभ्यो योगैश्वर्यदानेन दत्त

जातो रुचेरजनयत्सुयमान्सुयज्ञ आकूतिसूनुरमरानथ दक्षिणायां ॥ लोकत्रयस्य महतीमहरद्यदार्तिं स्वा-
यंभुवेन मनुना हरिरित्यनूक्तः ॥ ॥ जज्ञे च कर्दमगृहे द्विज देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे ऊ-
चे ययात्मशमलं गुणसंगपंकमस्मिन्विधूय कपिलस्य गतिं प्रपेदे ॥ ३ ॥ अत्रेरपत्यमभिकांक्षत आह तुष्टो द-
त्तो मयाहमिति यद्भगवान्स दत्तः ॥ यत्पादपंकजपरागपवित्रदेहा योगर्द्धिमापुरुभयीं यदुहैहयाद्याः ॥ ४ ॥ त-
प्तं तपो विविधलोकसिसृक्षया मे आदौ सनात्स्वतपसः स चतुःसनोभूत् ॥ प्राक्कल्पसंप्लवविनष्टमिहा-
त्मतत्त्वं सम्यग्जगाद मुनयो यदचक्षतात्मन् ॥ ५ ॥ ॥

त्रिर्दर्शयति ॥ यस्य पादपंकजयोः परागः तेन पवित्रो देहो येषां ते उभयीं ऐहिकीमामुष्मिकीं च भुक्तिमुक्तिरूपां
च ॥ ४ ॥ सनत्कुमारावतारमाह ॥ मे मया आदौ तप्तं तपः तस्मात्स्वतपसः सनात्तपसो हेतोः सहदिः वतः सनो भूत्सन-
त्कुमारः सनकः सनंदनः सनातन इति चत्वारः सन शब्दा नाम्नि यस्य सः कथंभूतात्स्वतपसः तोषेन यत्र विविधानां लोकानां स्र-
ष्टास्म तपसः सनातन ... नानाम समर्पणादित्यर्थः ॥ प्राक्कल्पसंप्लवे प्रलये विनष्टं आत्मतत्त्वं संप्र-
दाय आत्मतत्त्वं हृदि स्थितं सम्यक् जगाद तदा तत्सम्यक् दर्शयति यत् दितमात्रमेव मुनयः आत्मन्समत

॥ २ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नह्वनात्मायत्तानितापाह ॥ धर्मस्य पत्न्यां दक्षदुहितरि मूर्तिसंज्ञायां नारायणो नरऋषिरिति मूर्तिद्वयेन जातः कथंभू-
तः स्वस्य असाधारणः तपःप्रभावो यस्य तद्देवाह ॥ अनंगस्य पृतनादेव्योऽप्सरसः भगवतः सकाशात् ॥ आत्मनः
स्वप्रतिकूलाः उर्वशीप्रधानाः स्त्रीर्दृष्ट्वा तस्य नियमावलोपं व्रतभंगं घटयितुं साधयितुं न शेकुः यद्वा आत्मनः
स्वस्य यो नियमः तपोनाशानर्हरूपः तस्यावलोपं न त्वटदृष्ट्वा भावनतत्त्वं घटयितुं न शेकुरिति ॥ एतच्चाख्यान-
मेकादशे भविष्यति ६ ॥ यत्र कामविजयी क्रोधयोऽपि बिभेति तत्र कामेन प्रभूयतीति किं वक्तव्यमित्याह कामाभि
ति कृतिनः श्रीरुद्रप्रमुखाः ॥ रोषपूर्णया दृष्ट्या दहंति रोषं ह्यात्मानं दहंति क्रोधेनाभिभूयंत इत्यर्थः

का

दहन्तमपि ते न

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नरऋषिः स्वतपःप्रभावः ॥ दृष्ट्वात्मनो भगवतो नियमा-
वलोपं देव्यस्त्वनंगपृतना घटितुं न शेकुः ॥ ६ ॥ कामं दहंति कृतिनो ननु रोषदृष्ट्या रोषं दहंतमुत
ते न दहंत्यसह्यं सोऽयं यदंतरमलं निविशन् बिभेति कामः कथं नु पुनरस्य मनः श्रयेत ॥ ७ ॥
विद्धः सपत्न्युदितपत्त्रिभिरंति राज्ञो बालोऽपि सन्नुपगतस्तपसे वनानि तस्मा अदाद्ध्रुवग-
तिं गृणते प्रसन्नो दिव्याः स्तुवंति मुनयो यदुपर्यधस्तात् ॥ ८ ॥

मचेतनर

ननु सहैवमस्तु अयं रोषः यदंतरं यन्मध्यं प्रविशन्नलं बिभेति ॥ प्रबोधचंद्रोदये रोषोक्तिः ॥ अथ पीकवो मिथुनं नंव-
धिरीकरोमि धीरं सचेतनमचेतनतां नयामि कृत्यं न पश्यति न चात्महितं शृणोति धीमानधीतमपि येन प्रतिसंद-
धाति यद्वा यस्यांतः मनः कथंभूतं अमलं निर्मलं प्रविशन्निति ॥ ध्रुवचरित्रेणोविवक्षमपि ध्रुवतां व्यवस्थापयति मातुः सप-
त्न्याः उदितानि उक्तानि वाक्यानीव पत्रिणो बाणाः तैर्विद्धो ध्रुवः अंतः ज्ञानाद्दृश्यति समीपे तनपस्ते तपस्ते ध्रुव-
गतिं ध्रुवपदं यो अपरिविद्धितां प्रथसनातस्थितनाः द्विविभवादिव्याः सप्तर्षयः स्तुवंति ॥ यद्वा उपरि भृग्वादयः अ-

भागवतस्कंधटी० २ ॥

नदा१

श्री
भा॰टि॰
टी
२३

पृथ्ववतारमाह । यद्यदा ऋषिभिरर्थितः वेनं त्रात्वा पुत्रत्वं इति पदं नाम लेभे पुंनाम्नो नरकाद्यस्मात्पितरं त्रायते सु-
तः तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति दिशत्रपदं बभूवनिति । कथंभूतं द्विजानां शापवाक्यमेव वज्रं तेन विप्लुष्टं दग्धं
पौरुषं भगमैश्वर्यं च यस्य तं वेनं । येन जगति निगदर्थं वसूनि व्रीह्यादीनि दुग्धा ॥ ९ ॥ ऋषभावतारमा-
ह । नाभेर्भार्यायां मेरुदेव्याः सुदेवीत्यपि संज्ञा । जडवद्योगेन निःसं-
गतया स्थितिर्यस्मिंस्तत्पारमहंस्यं पदमृषयो आमनंति हेतुः समदृक् स्वस्थः स्वरूपे स्थितः यतः प्रशांतः यतः परिमुक्तसं-

यद्वेनमुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरये पतंतं ॥ त्रात्वार्थितो जगति पुत्रपदं च लेभे दुग्धा वसू-
नि वसुधा सकलानि येन ॥ ९ ॥ नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृक् जडयोगचर्यां ॥ यत्पारमहंस्य-
मृषयः पदमामनंति स्वस्थः प्रशांतकरणः परिमुक्तसंगः ॥ १० ॥ सत्रे ममास भगवान् हयशीर्ष अथो साक्षा-
त्स यज्ञपुरुषस्तपनीयवर्णः ॥ छंदोमयो मखमयोऽखिलदेवतात्मा वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः ॥ ११ ॥
मत्स्यो युगांतसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः ॥ विस्रंसितानुरुभये सलिले मु-
खान्मे आदाय तत्र विजहार ह वेदमार्गान् ॥ १२ ॥

ग्राध्यायः

म२

गः ॥ १० ॥ हयग्रीवावतारमाह । सत्र इति । अथोऽनंतरं स एव साक्षाद्भगवान् मम ब्रह्मणः सत्रे यज्ञे हयशीर्षा आस तप-
नीयं सुवर्णं तद्वर्णो यस्य सः । छंदोमयः वेदमयः तद्विधेयार्थमयो वा । तन्मयश्च मूर्तमय इति पाठो वा । खिं यज्ञनीयाश्चाखि-
लदेवतास्तदात्मा च श्वसतोऽस्य नस्तः श्वासे प्रवृत्ते नस्तः नासापुटात् उशतीरूपान्यः कमनीया वेदलक्षणा वाचो बभू-
वुः ॥ ११ ॥ मत्स्यावतारमाह । मत्स्य इति । आदिना वैवस्वतेन मनुनोपलब्धः । क्षोणीमयः पृथ्वीप्रधानः तदाश्रयत्वमन्वर्थं । अत ए-
व निखिलजीवनिकायानामाश्रयः । मम मुखाद्विस्रंसितान्स्खालितान्वेदस्य मार्गान्वेदायनत्रयमार्गान्सलिले

नादर

२३

कूर्मावतारमाह ॥ क्षीरोदधौ कच्छपवपुः मन्दरगोत्रं [illegible] मथनार्थं मंदरगिरिं पृष्ठेन विधृतवान् कदाचि
त्नल दे पृष्ठे यत्तीराभिमुखं मयूनां सलिलनिद्रायाः स्त्रुणः श्वसनवेगमेवो वायस्यसः शृद्धेः परिवर्तः परिभ्रमः
स एव कषाणाः कषणं वर्षीतांसु स्वप्रदोय स्यासौ कंडूयस्यसः पृष्ठाग्रद्धिपरिवर्तएव कषः कषणं तेन श्राण
ति श्रपयातीति कषाणः कंडूयस्य ॥ ३ ॥ श्रीनृसिंहावतारमाह दैत्यविष्टपादेवानेषामुरुभयं हंतीति तथा

दीप्तोदध्यावंमवदानवशृयपनामुन्मथ्यनाम्भस्यनलत्रय यथादिदेवः ॥ पृष्ठेन कच्छपवपुर्विदधार
गोत्रं निद्रालुतागोद्विपरिवर्तकषाणकंडूः ॥ ३ ॥ दैत्यविष्टपोरुभयहास नृसिंहरूपक्रमनाभ्रमदृग्दिदृक्
शालवज्रं ॥ दैत्येंद्रमाशुगदयाभिपतंतमारात्दैत्यानिपात्यविददारनखैः स्फुरंतं ॥ ४ ॥ श्वेतः स्वरस्युसर्व
लेनपदेयहीनोश्राहेतास्यपाति भुजहस्तेश्रालं ॥ श्राहेदमादिशुरुषादिलल्लोकनाथनीयेश्र
वः श्रवणमंगलनामधेय ॥ ५ ॥ कृत्वाहविभिसमरणाधिनतंश्रमेयस्वंकासुक्षः पनगतां
जभुनाथिहर्द ॥ वर्केरानकृतवदनेविनियाप्यनसंवादस्तेश्रयरूपमगान्के
नद्भूदताम् बा
पयोजहार ॥ ६ ॥

समभगवान् ॥ कथंभूतं श्रमं न्योभुजरोदंष्ट्राश्वयसिनलकपालवज्रं यस्मिन् तं दैत्येंद्रं स्फुरंतंश्रागतं समीपम
वगदयाउपलक्षितेनश्रभिपतंतं नखैर्विददार हरिविष्णुरामे ४ हरिसंवत्कावतारमाह श्वेतरितिसेनगन पुन २
श्रुयस्यपतिः तीर्थरूपंश्रवो यस्यसः तीर्थश्रवाः श्रवणेनैव मंगलं नामधेयं यस्य ॥ ५ ॥ तद्वचनं कृत्वा
प श्लो २ पारणार्थिनं तं हस्ते गृह्यजायां प्रयच्छ किं कृतवान् कस्य श्राहस्य वदनं विनिष्पात्य विदार्य तस्मान्नतद
रतात्र ॥ ६ ॥ रूपयोन हारउद्धृतवान् ॥ ६ ॥

द्वितीयश्रवः २

श्री
भाग
द्वि
२४

वामनावतारमाह ज्याय इति सुतानामादित्यानां मध्ये अधियज्ञः यज्ञाधिष्ठाता विष्णुः अवरजः कनीयानपि गुणैः।
ज्यायान् श्रेष्ठः गुणानेवाह । यद्यतः इमांल्लोकान्विचक्रमे पादन्यासैः क्रांतवान् अथ प्रतिश्रुतानेव क्ष्मामेव । तत्र हेतुः
बलेः क्ष्मां वामनरूपेण जगृहे न त्वीश्वरः स्वयं किमिति तथा चक्रे । तत्राह याञ्चां विना धर्मसेतौ वर्तमानो न चाल्यः
ईश्वरोपि त्रिपदश्छलनीयः इति ॥ १७ ॥ ननु तर्हि याञ्चयापि चालनमनुचितमेवेत्याशंक्यालनोपि केवलमालोक्यादि दास्यामी
त्याशयेन छलं तदा नित्याह । नार्थ इति । ...पाधिपत्यं इदानीं बलात्प्राप्तं ... दीयमानं च यद्बलेः पुरुषार्थो न।

ज्यायान्गुणैरवरजोप्यदितेः सुतानां लोकान्विचक्रम इमान्यदथाधियज्ञः । क्ष्मां वामनेन जगृहे त्रिपदच्छलेन
याञ्चामृते पथि चरन्प्रभुभिर्न चाल्यः ॥ १७ ॥ नार्थो बलेरयमुरुक्रमपादशौचमापः शिखाधृतवतो विबु
धाधिपत्यं । यो वै प्रतिश्रुतमृते न चिकीर्षदन्यदात्मानमंग मनसा हरयेऽभिमेने ॥ १८ ॥ तुभ्यं च नारद भृशं
भगवान्विवृद्धभावेन साधुपरितुष्ट उवाच योगं । ज्ञानं च भागवतमात्म
सतत्वदीपं यद्वासुदेवशरणा विदुरंजसैव
॥ १९ ॥ १

इति मेव

भवति कुतस्तत्राह । उरुक्रमस्य पादशौचं चरणक्षालनजलं आपः प्राप सर्वतो धृतवतः शि
खायामपि धृतवतः किं च प्रतिश्रुतेनार्थेन यो प्रतिश्रुतं विना अन्यन्न चिकीर्षत् ... न
तु यन्नीयपादत्रयात् ... आत्मानं देहमपि अभिमेने अंगीकृतवान् एवं सदेहे त्रैलोक्यं प्रदद्यात् तद्वतो वि
बुधाधिपत्यमर्थो न भवतीत्यर्थः ॥ १८ ॥ हंसावतारमाह तुभ्यमिति भृशं विवृद्धेन भावेन सुपरितुष्टः सन्
भक्तियोगं साधुपरितुष्ट उवाच ज्ञानं चेति ज्ञानसाधनं किं तत् भागवतं नाम कथंभूतं तत्त्वमेव सतत्त्वं आत्म

तत्तन्मन्वन्तरावतारमाह ॥ चक्रमिति स्वतेजः निजं प्रभावमेव चक्रं सुदर्शनं बिभर्ति चक्रवद्वर्तते इति प्रभावं बिभ
र्तीत्यर्थः न देवो हि मनुवंशपालकः सन् त्रयाणां लोकानां लोकालोकपर्वतेऽपि स्थिते सत्यलोकेऽपि कमनीयां स्वकीर्तिं वि
स्तारयन् राजसु दण्डं विधत्ते ॥२०॥ धन्वन्तर्यवतारमाह लोके अवतीर्य धन्वन्तरिः सन् पुरुरुजां महारोगिणां स्वनाम्नैव रु
जः रोगान् हन्ति स्वयमेव कीर्तिरिति कीर्तिकरः अमृतमयमायुर्यस्मात्सः ॥ अवरुन्धे अवरुन्धे प्रति

कीर्त्यमिति ६

वक्रं च दिक्ष्वविहतं दशसु स्वतेजो मन्वन्तरेषु मनुवंशधरो बिभर्ति ॥ दुष्टेषु राजसु दमं व्यदधात्स्वकीर्तिं सत्ये
त्रिपृष्ठ उशतीं प्रथयंश्चरित्रैः ॥२०॥ धन्वन्तरिश्च भगवान्स्वयमेव कीर्तिर्नाम्ना नृणां पुरुरुजां रुज आशु हन्ति ॥
यज्ञे च भागममृतायुरवावरुन्ध आयुष्यवेदमनुशास्त्यवतीर्य लोके ॥२१॥ क्षत्रं क्षयाय विधिनोपभृतं म
हात्मा ब्रह्मध्रुगुज्झितपथं नरकार्तिलिप्सु ॥ उद्धन्त्यसाववनिकण्टकमुग्रवीर्यस्त्रिःसप्तकृत्व उरुधारपर
श्वधेन ॥२२॥ अस्मत्प्रसादसुमुखः कलया कलेश इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे ॥ तिष्ठन्वनं सद
यितानुज आविवेश यस्मिन्विरुध्य दशकन्धर आर्तिमा
र्छत् ॥२३॥

प्र
वेदं यज्ञभागं चावरुन्धे लभते ॥ ब्रह्मध्रुक्छलिनि पा... स्वयमेवार्यः सत्पुरुषैर्विसृष्टं वेदं चानुशास्ति प्रवर्तयति ॥२१॥ प
... तस्य भागं ... वन ... नर्थिनि मिति वा ब्राह्मणेभ्यो दुह्यन्तीति नय
स्मरामावतारमाह ॥ नयनः तया यथाविधि पालादेवेन उपभृतं संवर्धितं ... स्मर्थितं मितिवा ब्राह्मणेभ्यो दुह्यन्ती ... नय
... ब्रह्मणः ... पंथा वेदमार्गो येन अतएव नरकार्तिलिप्सनीति ॥२२॥ रामावतारमाह ऋषिः अस्माकं ब्रह्मादीनां प्रसादे
... सुमुखः कलया भरतादिरूपया सह ॥ कलेशो मायानस्याईशः गुरोर्दशरथस्याज्ञायां निष्ठन्सीतालक्ष्मणाभ्यां
सहितो वनमाविवेश ॥ यस्मिन् विरोधं कृत्वा रावणो नाशं प्राप ॥२३॥

एवंभूतं अवनेः कंटकतुल्यं क्षत्रं असौ महात्मा हन्ति उद्धन्ति उत्पाटयति दीर्घा तीक्ष्णा धारा यस्य परशु
ना
(२)

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यस्मैरामायउदधिर्मार्गंददौ। सपदिशीघ्रंहरोयथाविपुरंदिधक्षुःनहन। शरिपुरेलंकांदग्धुमिक्रांयष्टीवतुर्यथेयंसुहापंव
श्रीमाहि-
दी-
२५
मीपंदिधतोशामात। यद्रुयशांमंतेनाराकेपायस्यतिकथंभूतउदधिःस्वधर्मंयद्रूयंतेनसगोपुत्रवपःकपायस्यश्रमेसंतुःदृ
देवर्नेमानासुहनसीनात्याविमित्रभूतयाम। यितःस्तमितावाधःतेनमुखाणाग्रस्यकरणाद्येष्टिःनयाग्रन्यंतेनप्यमानम
कारणांनक्राणांचक्रोयस्मिन।२४। किंवपुंडरावगास्यवृंदस्यलस्यथेनकग्राभग्रामहेंदवाहस्ययेरावनस्यदंतास्त्रैविडं
विताःस्थवलिम्राथवलीकृताः। नत्रदृष्टिपतितेःप्रकाशितास्त्रधःयायवंभूताःऊभादिशाःतानुषनेसेवनेपालयनीनित
प्रयनेष्वत्यति२
यातस्यदारहर्तुः। रावणस्याहोमम्नमःकोन्येस्तीतिमहावार्वणाऊर्ध्वाममहामंत्रस्तमिःश्राणैःसहस्रयःशीघ्रंविनेष्य
तिकोपंतुषाविस्फूर्नितेःदांकावद्वोषेरेवकथंभूतस्याधिसैन्येसवदैस्यमध्येउस्वरनःउत्कर्षविवरनःकुऊग्नयट
दहासमितिपाठेदंतेकृत्वालिनानांकऊमानयेनस्यादृढोहासःसंजातोवर्गुःतमपनेष्यतीत्यर्थः॥२५॥श्रीकृस्नावना
यस्याग्रदाडुदधिवृत्रभयांनवेपामार्गेसपदिपुरंदरवृद्धिश्चदौःइत्येवंहृत्कथितुरोसस्तवाणाललाटदृष्ठानानप्य
मानमकरोरवानचवक्रा।२४। वत्सस्यालसपांकगमहेवाहदंतैर्विडंवितऊ्रधर्हेटहासं। सयोम्रुभिःसह ऊ२
विनेष्यतिरावहर्नुर्विस्फूर्जितेर्धनुषः ... १५। भूमेःस्तुवेनदवतूर्यदविमर्दिनायाःक्रोधाव्ययाय
कल्याणिनकस्त्रकोपंज्जानांकारिव्यातिजनानुपलव्यमार्गःकर्माणांचोन्नमहिमायनिर्वंधनानि ॥
॥राम॥ ॥ भगवान्॥
रमाहभूमेविनिदयाभिः सवेनराप्रस्तवांपासंभूताःराज्ञानतेषांवराधःसैन्यैःविमर्दिनायाभारेणपीडितायाः
मनु२
कलयाराभेणसहजातःमर्तकोसौजातःसितकृस्नौकेशौयस्यसएवसाक्षात्सितकृस्नकेशयोर्वेपामेवनतुवयः
परिणामकृतेन्श्रविकारितात्यतन्तंश्रीविस्पुराणे।उज्जहारात्मनःकेशोसितकृस्नौमहामुनेदेवानियवभा
रेतुसचापिकेशोहरिरुद्धरूष्टमनसकमप्रवेयापिकृस्नेनोचापिकेशावाविशानांयदूनांकुलेस्त्रियोवाहिणीदेवकीचितयो
शकावलभद्रावभूवयासोश्रवनेःतस्यदेवस्यकश्चःकृस्नाद्वितीयःकेशवःसंवभूवकेशोयासौवर्णितःकृस्नउक्त। इतितन्तुत
कपामाशवतारामिप्रायंकिंतुभारावतारणरूपकार्यकियत। यनतु। सकेशावतनकर्तुंशक्तोसमर्थोइतिश्रोतुनार्यंश्रीराम
कृस्नयोर्वरीसवनार्यंकथाउत्पणमितिगम्यत। अस्ययाकेचवृप्यवायपविरोधाप्रतःकृस्नस्तुभगवान्स्वयमित्यतंहिराघा
वेकथंभूतंत। श्रीपरमेश्वरतयाजनैरनुपलब्धामार्गोयस्यनतंहिइसवर्वकिंमाणप्रतिमावष्यकर्मान्मयानुरूपपात्रिरेव

श्रीमानप्यमानमहिमानामप्रमेयवैभवस्य... प्रणतिरूपित... २५

पतत्स्वप्रपंचयति। लोकेन्यादिनावालेनपूर्ननार्यनीवद्दरंगावनसिंनाजानुभ्याबाह्वतास्नवगेतेनमध्येप्राह्नेनदिविस्पृष्टशो
न्नसुह्मयो: स्तनस्यर्ष्ट्रनीश्वरवेतनुभवितव्य ॥ २ ॥ विष्व तो यपीनानविषवतोयस्यपीनेयानयेषांपात्लानशोपात्लाश्शुक्रूपादृष्टि
सुधावृष्ट्यानीविष्यतीति यमुनायांकोइन उ वर्त्तकालियमुत्राइविष्यतिनकुद्दयेतस्याद्दिन्यानिविषयत्वायश्नितिविषवी।
र्याला विलोलावेवलाजिह्वयस्य ॥ २४ ॥ दिव्यमल्लोकिम केश्वेति लोकोक्तिः उद्गेष्यतिउद्भूविष्यनिशुविः ग्रीष्मः तस्सिंबधिति
वनेष्वस्फरत्यर्थः अग्नेर्दवाग्नेर्हेतोः एवमितोनानिश्चितोभ्नेनकालोपस्यननसबलत्वः सरंमः ॥ प्रनयिवास्येउदीर्घ्ययुक्ष्मः त
कीर्य

यदेहूनेवजनपानि व तोयपीनान्यालांश्रजीवयनुग्रहदृष्टिवृष्ट्या॥ तकुद्दयेति विषवीर्यविलोलजिह्वस्वाद वि।
ष्यदुष्टगैविहृवनदृदिन्यां ॥ २५ ॥ तेकिंनजीवद्दवगांयडत्रृकिंकाया स्ते मासिकस्यचपदशकटोपवृत्तः यद्धिंगतोन।
वगेनतदिविसृप्रावोंडल्लललंविलयाृनयार्भशाखं ॥ ५ ॥ तक मंदिव्यमिवयन्निशिलिः शयानंदावाग्निनाभु।
विविवयादिदहमाने ॥ अहेष्यतिअत्म तोवसितानकालेनेज्ञेश्यिायलवदलोनयिगम्याबीर्या ॥ २६ ॥ गृहीतंयषड़
विवेषपदिदहमाने अत्रेष्यतिउत्तमतोवसितानकालेने यंजभतोंयवदनेभुवनानिगोपीरावीशंकितमानांप्रबो।
प्रवर्धमनुष्यमाजाभुलंवलनलंनलतन्नदसुष्यमातिशापङोपांविलसूपिदितानायसूनुनाबंधहृष्णनिशिशयान
पिलासीत ॥ १ ॥ नेदंहेसोत्यतिभयहृष्णास्यापाशाङ्गोपाविल्लपुष्पिदितानायमुनवंध्याप्तनिशिशयान
मन्ज्ञसेणालोलेविङ्कउपने प्यतिगोकुलतमु ॥ १ ॥

तनिशीथिनि:शयानमितिका लोदमने रात्र्यांयमुनानीवेनेचपिधायपिहितेकारयितिवातिसंनादव्याक्तितिस्येयं २५ उ
पवायतनेनेनतिउपवेयंतन्माधनेप्युत्लदामप्रवुष्यमानायशेषा ॥ य गृहीतेशुष्यनमातिबंधनसमितनुभवतिनपूर्यन
नत्यर्थ: ॥ गापीयशोदासंवीत्पटष्ट्वाप्रतिवोधिता निजेप्रवर्यत्तापिताग्रासीततत्रक मपिव्यमेवतिसर्वत्रपूर्वएवोन्व
यः वलपास्य प्राशातभयंयतन तस्मान्मोचयिष्यतिमयस्तुतनावोमनास्त्राप्रष्टनं निशिशयानमितिविङ्कउद्वाग्निसाध
तावद्धानाभावादपुतिः उपनेष्यतिगोकुलवासिनंजनमस्मान्यार्थे ॥ ३९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नि २

श्री भा टी ३६

देवेन्द्रेषु प्रभूतं विबन्धः। विदत्तात्रिभुवितापर्षः। अनन्तं प्रमादि तेषु कामिनूपवक्रो सती तयया तथा महीध्रं गोवर्धनं यत्नी यारयि
प्यानितश्छि लिदेउ दृतं छन्नाकमिवसप्तवर्षाणि वयाप्ययम॥ ३९॥ निशायानी निशाकर वपिमभिः गोपीध वलायां वनेक्रीडन्
कलानि मधुराणि पदानि यस्मिन तत्तत्र तत्साप्रायनेदीर्घमूर्छितं प्रलापविशेषमुक्तं गीतेन उद्दीपितः स्मरः एवं कृतया स्तना सां गो
पीनां हृतं श्रावव उस्यपशिरसे हविष्यानि॥ ४०॥ येच प्रलंबादयः नसर्वेहविणहन्तभूतेन नित्यपंप्रदर्शितं दर्शनायोग्याः वेंकंठप्र

तं २

गोपीजनेषु प्रलिहृतेन वनविहारवासदेवेन विद्युविनिपं प्रनूकृपयाविश्व॥ धनों क्रितलिं हसिववसुप्रदितानि सप्तवर्षीम
हीनमनवेनकेवलकरे सलीलं॥ ४०॥ क्रीडनवने निशितिषु पाक करा पिम गोपीवासो कुले कलपदायन मूर्छितेन॥ उद्दी
पितस्मरह्रगोपबन्धुस्पह वधुलोहर्तुर्दहविरयानि शिरे वैधनं॥ यानुगामम॥ ४१॥ येच प्रलंबादावबद्धे नके पूर्णमिवमहोप्रकंस
प्रवराहूम पौड्र काया॥ अन्येव पशाल्वक पिवल्ल इत्वबक्रसमेहितशा दिहरयहल्विमधुवा॥ ४२॥ ये चापि
समुतिशालितप्राप्तनवा पाः। कांबोजमत्स्यकुरुकेकयसंजयाधा॥ यस्यं नादर्शनमलंबलपार्थभीमव्याजा
न्हयेन हविणानि तयां नदीय॥ ४३॥

लं २

लेयासंग्रनीपु तेषे पिडयं वरोधिनुकः दुईरपवदईरोबकः। तमः कुवलयापीडेकपिंहिविदः कुंजोनवकः॥ ४४॥ येच नृपयग्न
नवापः सेमिनीसंग्रमेवाननेनेसापयं नसमितिशालिनः नतु प्रलंबादिवत्केवलं किंप्रमुखाः बलैर्भद्रणानिहताः कांबोजादयश्चभीम
सेना दिभिः शंवरः प्रद्युम्नेन हतः वेनमपुरुदेनं नतुहरिणा नत्राहवलं॥ भीमपार्थसन्यादयोव्याजाहु याकपटनामानियं
स्यतेन समग्रादानन्ततेन दमितं कालानेर्यस्यं तीतिभावः। एतत्सर्वमपिकर्मदिव्यामिवनत्राशीन भाव्यमितिएवं

श्रीभागवतं टी ३६

५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

व्यासावतारमाह अनुयुगं मीलितानां बुद्धिनाशं धीर्येषां स्तोकमल्पमायुर्येषां स्वनिगमस्स्वकृतो वेदराशिः वत
अहो दूरेपारं यस्येति दुर्गमइत्यवमृश्य सत्यवत्यामाविर्हितःसन् ॥ सएव हरिः ॥ विटपशः शाखाभेदेन ॥३६॥
बुद्धावतारमाह देवद्विषां निगमवर्त्मनि निष्ठितानां नितरां संस्थितानां मयेन बहुभिर्दुर्वीभिः अदृष्टगतिपु
रीभिर्लक्ष्यवेषासिर्मतेर्विमोहः योग्यतान्यायोगाय स्मान्मतेः प्रलोभञ्च प्रयुक्तभीकारो यस्मात् ॥ तं पाषंडवे
षं विधाय तेन औपधर्म्यं पाषंडधर्मं स्वार्थं बहु भाषिष्यते अर्थः ॥३७॥ कल्क्यवतारमाह ॥ यर्हि यदा सतां

कालेनमीलितधियामवमृश्यनॄणां स्तोकायुषांस्वनिगमोवतदूरपारः ॥ आविर्हितस्त्वनुयुगंसहिस
त्यवत्यांवेदद्रुमंविटपशोविभजिष्यतेस्म ॥३६॥ देवद्विषांनिगमवर्त्मनिनिष्ठितानांपूर्भिर्मयेनविहि
ताभिरदृश्यतूर्भिः ॥ लोकान्घ्नतांमतिविमोहमतिप्रलोभंवेषंविधायबहुभाष्यतऔपधर्म्यं ३७
यर्ह्यालयेष्वपिसतांनहरेःकथाःस्युःपाषंडिनोद्विजजनावृषलान्नृदेवाः ॥ स्वाहास्वधावष
डितिस्मगिरोनयत्रशास्ताभविष्यतिकलेर्भगवान्युगान्ते ॥३८॥ सर्गेतपोहमृषयोनवयेप्रजे
शाःस्थानेचधर्ममखमन्वमरावनीशाः अंतेत्वधर्महरमन्युवशासुराद्यामायाविभूतयइमाःपु
रुशक्तिभाजः ॥३९॥

मप्यालयेषु त्रैवर्णिकाः पाषंडिनः स्युः शूद्राराजानः तदा कल्किरूपेण कलेः शास्ता भविष्यति अत्र बलन
रदसंवादात्प्राग्भाविनो वराहादयः मत्स्यकूर्मावतारास्तु भूताभाविनश्च यन्नेतविपरशुरामो नदावर्त्तते ॥ श्रीरामना
दयस्तु भाविनः तत्रतत्र विद्रुतादिनिर्देशोक्तादसः इति द्रष्टव्यं ॥३८॥ सर्गसृष्ट्यादिकार्यभेदेन मायागुणावतारवि
भूतीराह सर्गइति स्थाने स्थितौ नामखो विष्णुः धर्मस्य मखस्य मनवश्च अमराश्च अवनीशाश्च ते संहारे हरो रुद्र
इः मन्युवशाः सर्पाः बहुशक्तिधारिणो भगवत इमा विभूतयः ॥३९॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
मोहि
हरिं
३

विष्णोर्नुवीर्याणि कं प्रवो चं यः पार्थिवानि विममे रजांसि विममे यः स्कंभ्या वि क्रममाण त्रेधो लोकमुद्गस्य स्कंभं यत्र धर्म्यस्य पद०

इदं मया मंदेऽपि तेषां केविष्णोः श्रवणवक्तुं न कोपि समर्थ इत्यादि॥ पृथिव्याः परमाणून् यो विममे गणितवान् नाहं शेषोपि को
विष्णोर्वीर्याणि गणना कर्तुं महति॥ कथंभूतस्य विष्णोः त्रिषधस्थं सत्यलोकं च स्कंभ भूतवान्॥ किमिति वस्कंभयस्मात्
त्रिविक्रमेण समुन्नतनाप्रतिवान भूत्यनेस्वं बद्धत्वात् स्वपादवेगेन विसाम्यत्वपंसदनम धिष्ठानेन प्रदानेन तस्मादारभ्य उ महर्ज्जनतपयद्धपादि ३
हृपृथिवीं कंपयानं कंपेन युक्ते यस्येति वा भूतः कारणात्रस्कंभ॥ प्रातिषष्ठमिति वा छेदः सत्यलोकमभिव्याप्य
तवे भूतवानित्यर्थः तथा च मंत्रः विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि विचक्रमाणः त्रेधोरुगाय इत्यर्थः।
यः पार्थिवानि रजांसि पृथिवीमममे सोपि यो विष्णुः त्रेधा विचक्रममाणः त्रिविक्रम ऊर्ध्वलोकं स्कंभयन्
विष्णोर्नुवीर्याणि कं न मे वर्द्धतीदयः पार्थिवानि विममे रजांसि॥ वाक्यं भ्रयः ... वक्तना विष्ट
हंसयस्मात्रिसाम्यमसरत्नाद्रुरुकंपयानं॥ ३५॥ नानं विदाम यदहममीसुनमो...जा स्रैमा या न वतस्य पुरुषस्य
२ कृतोपरेयं॥ मायन्नुपाद शश्वानानातनमृष्टिदेवः श्रोषो यनापि समवस्यति नाप्रपानं॥ ३६॥ तेमासय
वगगवाद्यर्पयेदनंतः सर्वात्मनोऽश्निनपर्दयादिनिर्व्यलीकं॥ तेङ्स्तवाममतितरंतिचदेवमायां नेषां मम
मादमिति योः स्मृसर्गलं
भवेयर
प्रवष्टवान् कथंभूतं समथस्यंसद्वस्यसमाप्देशः॥ तिष्ठं नीतिस्याः तत्र प्रेर्य देवेसद्दवर्तमानमित्यर्थः॥ ३६॥ प
तन्प्रपंचयनितिनानमिति॥ पुरुषस्य यन्मायाबलेन तस्या नन विदामिन वेभ्विदशाशानान्यानन्नानिय स्यासोपि
श्रसर्ग लोनगायनम् समवस्यति नप्राप्नोति॥ ४॥ यदि न केपि विदंतिनहिं कथं मुच्योरन॥ तत्कृपयेवेत्याह येषा
मिति द्वयेयत॥ दयांकुर्यात्तनेवयदिनिष्कपटंश्राष्टिनवरणामवंतितेतुस्तरी देवमायांप्रति च कारादन्यायो
वैममेवंविदंतिवशेयेति वा पादः अत्यतमेवतेषां मायानवरणमित्यादि तेषामिति श्वसृगालानांमदयोदेहे
॥१२ ३९

पारं ३

नरसिं ३

श्रुतं तांना भावे पिमायेयमिति तानं तत्कृपया बहुनामस्तीत्याह वेदाहमिति त्रिभिः यूयमिति सनकादीनंतर्भा
व बहुत्वं दैत्यवर्यः प्रह्लादः मनुः स्वायंभुवः तस्य पत्नी च तदात्मजाः पुत्राः कन्याश्च प्राचीनबर्हिषो विसर्गा
लोपः ऋभुर्दक्षः ॥४३॥ शतधनुः प्रत्नुश्च संधिरार्थः रंतिदेवस्तुतिपाठः स्तुयामः एकस्मिन्नपि पत्नैः सहितो देवव्रत

वेदाहमंग परमस्य हि योगमायां यूयं भवश्च भगवानथ दैत्यवर्यः ॥ पत्नी मनोः स च मनु
श्च तदात्मजाश्च प्राचीनबर्हिरृभुरंग उत ध्रुवश्च ॥४३॥ इक्ष्वाकुरैलमुचुकुंदविदेहगाधि
रघ्वंबरीषसगरा गयनाहुषाद्याः ॥ मान्धात्रलर्कशतधन्वनुरंतिदेवदेवव्रतो बलिरमूर्त
रयो दिलीपः ॥४४॥ सौभर्युतंकशिबिदेवलपिप्पलाद ॥ सारस्वतोद्धवपराशरभूरिषेणाः
येऽन्ये विभीषणहनूमदुपेंद्रदत्तपार्थार्ष्टिषेणविदुरश्रुतदेववर्याः ॥४५॥ ते वै विदंत्यतितरंति च
देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः ॥ यद्यद्भुतक्रमपरायणशील
शिक्षास्तिर्यग्जना अपि किमु श्रुतधारणा ये ॥४६॥

॥ २

इत्यर्थः ॥४४॥ उपेंद्रदत्तः ऋषिकः विभीषणादयः वर्याः मुख्या येषां ते ॥४५॥ किं बहुना सत्संगेन सर्वेऽपि विदंतीत्याह
ते वा इति अद्भुतः क्रमः पादन्यासः यस्य हरेः तत्परायणाः सद्भक्ताः तेषां शीलं शिक्षा येषां ते तथा यदि भवंति
तर्हि तेऽपि विदंतीत्यर्थः श्रुतं भगवनो रूपेण धारणा मनोनियमनं येषां ते विदंतीति किमुत वक्तव्यं ॥४६॥

श्री भाडि टी २२

किंतद्भगवतः स्वरूपं यस्मिन्मनोधारणां विधाय मायां तरन्तीत्यपेक्षायामाह । शश्वदिति द्वाभ्यां यद्ब्रह्मेति विदुर्मुनयः तद्धि भगवतः स्वरूपं किं तत् ब्रह्म तदाह । शश्वत् नित्यं प्रशान्तं अभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परं आत्मतत्त्वं शब्दो न यत्र पुरुकारकवान् क्रियार्थो
तन्नैतो नित्यस्य स्वरूपं विशोकं वेदितुः प्रत्ययं कुतः यतः सर्वभेदशून्यं यतो भयं हि द्वितीयाद्भयं भवतीति श्रुतेः तत्कुतः
यतः प्रतिबोधमात्रं ज्ञानैकरसं ॥ ननु ज्ञानस्यापि नीलपीतादि नीलपीतादयाकारेणैव द्रव्यांशिकरणभेदेन भेदोऽस्त्येतेन
शुद्धं निर्मलं ॥ ननु दर्शितो विषयकरणादिवशाद्रूपाणामन्यथात्वं तदाह । सदसतः परं विषयकरणांशग्राहशून्यत्वेनैव तद्रूपा
रागेण ज्ञानस्येति भावः ननु तथापि ज्ञातृज्ञानज्ञेयभेदः स्यात्तत्राह आत्मतत्त्वं आत्मनस्तत्त्वं ज्ञानं स्वरूपमेव न ततो भिन्न
ननु वेत्तव्यो यनिषत्पुरुषं पृच्छामीति श्रुतेर्वाच्यत्वप्रतीतेः कथं बोधरूपत्वं तत्राह शब्दो न यत्रेति शब्दो पि तनिवृत्त्या वे
दशब्दस्य व्यापारो न तत्र बोधकत्वमित्यर्थः ननु भवतु नाम निर्गुणं वेदज्ञानरूपत्वात् ॥ विशोकं सुखस्य तु नानाकारकं ।

शश्वत्प्रशान्तमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वं शब्दो न यत्र पुरुकारकवान् क्रियार्थो
माया परैत्यभिमुखे च विलज्जमाना ॥ ४८ ॥ तद्वै पदं भगवतः परमस्य पुंसो ब्रह्मेति यद्विदुरजस्रसुखं वि
शोकं ॥ सध्र्यङ्नियम्य यतयो यमकर्तहेतिं जह्युः स्वराडिव निपानखनित्रमिन्द्रः ॥ ४९ ॥

साध्यक्रियाफलवान्कश्चिदजस्रसुखं विशोकं तस्येत्यत आह ॥ यत्र बहुकारकसाध्यः क्रियार्थः उत्पाद्याप्यविकार्य
संस्कार्यरूपं चतुर्विधं क्रियाफलं तच्च नास्ति इन्द्रियवृत्तीनां शब्दाभिव्यक्तिमितिविवक्षिता यावत्प्रात्यन्तं ब्रह्माभिव्यक्तिमात्रक्रि
यत्नेनोत्पत्त्यादिकमिति भावः ननु तत्त्वज्ञानाभावे पि मायामलापकरणात् ॥ ४८ ॥ तस्मादेवं भूते भगवति नियमितं
मनसो कृतार्था नान्यत्किमपि कृत्यमस्तीत्याह सध्र्यगिति सध्र्यक् सह इन्द्रियैः मनः यत्र नियम्य अस्मिन्स्थिरी
कृत्य यतयो यमकर्तहेतिं भेदः न भिन्नाः ग्रकतेः जह्युः निसाधनेन त्यजन्ति ।। निजे शुद्धप्रयोजनात्साद्यन्तेन
त्यर्थः उपयोगाभावेन साधनानां त्यागः हेतुः निपानखनित्रमिति निपानकूपः तत्खनित्रं खनन साधनं य
थास्वराट् स्वयमेव परमैश्वर्येण विराजमान इन्द्रो नाटनेन हेतिं यद्वा स्वेनैव राष्ट्रदृष्टः समाहृतः सनक

नविकार्यत्वं स्यादेव ब्रीहीणामिव तुषापाकरणेनेत्याशङ्क्याह । मायाभिमुखे स्थातुं विलज्जमाना वयस्मात्परैति दूरतो सरति ॥ ५ ॥
राजनीति सा ॥ सयथा इन्द्रः १

२०

[illegible] मायासम्बन्धादिति नित्यतावतीति [illegible]

एवं तावदजस्य मुखविशेषकं ब्रह्मैव भगवतः स्वरूपं तन्मात्रामात्रेण च प्राप्यं वा न किं विदस्तीति इदानीं ततः प्राकृतमेव
फलदातारमेव कर्मप्रवर्तकं चेत्याह सएव श्रेयसां फलानां विभुः दाता पितत्र हेतुः भावकोऽत्र गुणादीनां स्वभावैः प्रा
मदमादिभिर्विशेषणैः विहितस्य सतः शुभस्य कर्मणो यतः प्रवर्तकात् सिद्धिः यद्यभावान्न महदादीनां स्वभावेन
परिणाममेन विहितस्य सतः कार्यस्य प्रसिद्धिः सएव स्वर्गादीनां दातेत्यर्थः ननु कर्मकर्त्तृमृतस्य कथं स्वर्गादिफलं
स्यात् तत्राह स्वारंभकधातूनां भूतानां विगमे वियोगमति अनु विशीर्यमाणेऽपि देहे तत्र श्रेष्ठ व्योमवयः तेन सह न वि
अनु

सश्रेयसां स विविभुर्भावान्यतोऽस्यैव भावविहितस्य सतः प्रसिद्धिः देहस्वधातुविगमेऽनुविशीर्यमाणे व्योमवैत
त्पुरुषोऽनविशीर्यतीति नः ॥५०॥ सोऽयं तेऽभिहितः तात भगवान्विश्वभावनः समासेन हरेर्नान्यदन्यस्मात्सदसच्च यत्
॥५१॥ इदं भागवतं नाम यन्मे भगवतोदितं ॥ संग्रहोऽयं विभूतीनां त्वमेतद्विपुलीकुरु ॥५२॥ यथा हरौ भगवति
नृणां भक्तिर्भविष्यति सर्वात्मन्यखिलाधारे इति संकल्प्य वर्णय ॥ मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोद
तः ॥ शृण्वतः श्रद्धया नित्यं माययात्मा न मुह्यति
॥५३॥ इति श्रीभागवते महापुराणे द्विती
यस्कंधे सप्तमोऽध्यायः

वीर्यते यतः अतस्तेन सह न जातः तस्य पुरुषस्य जीवस्य श्रेयसां प्रभुरित्यर्थः ॥५०॥ अध्यायत्रयस्यार्थमुपसंहरति सो
ऽयमिति समासेन संक्षेपेणाभिहितः तमेवाह सदसत्कार्यं कारणं च हरेरन्यन्न भवति ॥ ननु हरेरन्यद्व्यतिरेके नस्तु न वि
कारणभेदाः स्यात् न त्वन्यस्मात्कारणभूतो हरिः कार्याण्यपि ततिरिक्त इत्यर्थः ॥५१॥ अयमेव विभूतीनां संग्रहः इतः प्र
यथा वर्णितेन नृणां भक्तिर्भविष्यतीत्येवं संकल्प्य सविस्तरं तथा च हरिलीलाप्राधान्येन श्रीभागवतं वर्णय ननु भक्ति
रसवितेन केवलं तत्त्वमित्यर्थः ॥५२॥ ननु लीला माया श्रयाकिं न हरेर्न नेत्यत आह मायामिति ॥५३॥ इति श्रीहितीयस्कंधे

सप्तमोऽध्यायः ॥ १ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

॥

श्री भा० टी० २२

श्रुत्वेदं सर्वं यथा दिव्या श्रीजीवयोः बहुत्वात् नैमित्तिकाः छेत्तुं गणाथानि भुक्तिनानत्वमेतच्छित्वा लीलां विन्दुकं तदेवं
विपुलीकरणं कृत्वा ब्रह्मणोऽति विभिः अगुरुश्च गणानीतस्यापि देवदर्शनं यस्य सः १ निमिषं गमान् स्त्रीक लेविके श्रुपति
स्वयत्नोदर्शितः सोपि ब्रह्महत्यासु एवं तेनावपुष्पकरूपाद् श्रुत्वा तेऽनिस्व प्रयत्नं विना भगवान् स्वयं सेव हृदि विष्णु
नि॥ ४ ॥भाव सरोरुहं हृदय कमलं प्रविष्टः तद्धं हृदयगतं सर्वं सतेधुनोनि सात्विकस्यैतिह व्यानं दवा स्त्रिया गणादिनां
मध्ये जलेपणायितेन देवे कवले श्रुध्यति मतनदीनं गङ्गादिगतं सचमलः कुलस्थानः शुभतीर्थस्थानेव नतसर्वं यानि

राजोवाच ब्रह्मन्नेतो दिवितो ब्रह्मनारायणाख्ये गुणमायं॥ गं भिपर्ये यथा प्राहुनारदो देवदर्शनः॥ पुनहे दितुमि
क्रासितक्ष्यं वेदविदां वर हे वेद कथिनी स्पकथालोकसमंगलाः ॥ ७ ॥ कथ्य गुह्यमहाभागयथा हुमाखितान
निवपणिमिषं गमनकृते कलि सर्वं ३ कुम्भनः श्रुत्वा नित्यं गृणतश्च स्ववेहितं॥ कर्तनतानितिटी धीणा भगवा
न्विशतेह दि च प्रविष्टः कर्णरंध्रेणात्मनां भावसरोरुहं॥ धुनोति शमलं कृष्णः सलिलस्य यथा शरत् ५
धौतात्मापुरुषः कृष्णपादमूलं न मुंचति मुक्तसर्वपरिक्लेशः
पांथः स्वशरणं यथा॥ ६ ॥॥

लीयंते श्रुत एवाकिं विस्त्रलनेन नपुनः स्तुस्यातिव एवं तपोदानादिप्रायश्चित्तेन नसर्वं यानि लीयंते [illegible] किंचित्तु
नतपुनः [illegible] सर्वेषां सर्वपापं पुनोति॥ किंनु मावशेष नत्वकस्यचिदेवकं विदेव हृदि शिविष्ट मात्रस्तु श्री
कृष्णः सर्वपापं नि:शेषं हरतीत्यनेन दृष्टांतेनाक्तं सलिलस्य मलं यथा शरदिति॥ ५ ॥ ततः सकृताः थे भवतीत्या
ह धौतात्मा निष्पापः मुक्तः सर्वरागद्वेषादयः परिक्लेशा येन पांथः प्रवासादागतः स्वशरणं गृहं यथा न मुंचति

निः॥ कः स्मे

सर्वेषां

२२

प्र

तदेवं अवयवोत्क्रममाविष्कृत्य संदिग्धानर्थान्पृच्छति यद्धातुमतः धातवो भूतानि तन्मयं देहशून्यस्य अस्य लौकिक
स्यात्मनः धातुभिर्देहारंभ इति यदेतत् किं यदृच्छया निर्निमित्तो हेतुना वा कर्मादिना भवंतो यथावज्जानते अतः कथ
यंतु निःशेषं ॥७॥ यच्चासावीश्वरः सोऽयमनंतत्वे देहवान् प्रोक्तः अनंतस्य को विशेषः इत्याशयेन पृच्छति ॥ आसी
दिति सार्धेन ॥ लोकानां संस्थानं रचना तदेव लक्षणं यस्य तत्पद्मं यस्योदरादासीत् असावीश्वर इयत्ता
प्रोक्ते अपि विभिन्नैरवयवैः अयं लौकिकः पुरुषो यावान् तन्मध्येकावयवपुंजः तावान् प्रोक्तः संस्थावान् अवय
ववान् एवं च प्रोक्तः अनंतस्य को विशेषः तस्येति ॥ एवं रूपं च विशेषो वाच्य इत्याह अजो बलाभूतानां व्यष्टिरूपो

धीनामात्मानि
यंतासम छुपा
१

यद्धातुमतो ब्रह्मन् देहारंभोऽस्य धातुभिः यदृच्छया हेतुना वा भवंतो जानते यथा ॥७॥ आसीद्यदुदरात्पद्मं लो
कसंस्थानलक्षणं यावानयं वै पुरुष इयत्तावयवैः पृथक् ॥८॥ तावानसाविति प्रोक्तः संस्थावयववानिति
व अजः सृजति भूतानि भूतात्मा यदनुग्रहात् ॥९॥ स चापि पुरुषो यत्र विश्वस्थित्युद्भवाप्ययः मुक्त्वा
त्ममायां मायेशः शेते सर्वगुहाशयः ॥१०॥ पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः लोकैरमु
ष्यावयवाः सपालैरिति शुश्रुम ॥११॥

ग्निव्यानयेन नारायणेनानुगृह्णाति तान् सद्रूपं ददृशे दृष्टवान् पद्मजस्तस्यापि विदद्धुरीशस्य कूटस्थस्य ह भविष्य
ति ॥९॥ प्रश्नांतरमाह सचापीति यत्र शेते येन रूपेण वा तिष्ठते विश्वस्थित्यादयो यस्मात् एवमादि प्रश्ना
नां तत्त्वतोऽर्हस्युदाहर्तुमिति सर्वत्र क्रियया संबंधः ॥१०॥ प्रश्नांतरमाह पुरुषस्यावयवैः पूर्वकल्पिताः
पद्मोदरावयवैः लोकान् कल्पयंतीत्यादौ लोके अमुष्यावयवा इति पातालमेतस्य हि पादमूलं
मित्यादौ चानुश्रुतेन नवेनावयवेन संदेहविपर्ययाभ्यामेवं ॥ ॥ । ॥ । ॥ । ॥ । ॥

स्याद्विलात्मनः स्वरूपं सत्यामिस्व होर्हमीहयेवा
भिचोदित इत्यादिनोक्तमपि यतेन्नगेनुस
जं... ५॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इदानीमन्यानन्बहून्प्रश्नान्पृच्छति यावानित्यादिना कल्पो महान् विकल्पोऽवान्तरः भूतादिशब्दो यस्मात् यस्य वा व
कर्तिवा सतः स्थूलदेहाभिमानिनो मनुष्यादि पितृदेवतादेः आयुषः प्रमाणं अनुमानप्रकारः पृष्टः ॥१९॥ विशेषं
पृच्छति कालस्येति अनुगतिः प्रवृत्तिः कर्मगतयः कर्मप्राप्याणि स्थानानि यादृशीर्यादृश्यः ॥२०॥ गुणानां सत्वा
दीनां परिणामं देवतादिरूपमिच्छतां गुणिनां जीवानां मध्ये यस्मिन् परिणामे कर्मणां पुण्यपापानां समवायः

यावान्कल्पो विकल्पो वा यथा कालोऽनुमीयते । भूतभव्यभवच्छब्द आयुर्मानं च यत्सतः ॥१९॥ कालस्या
नुगतिर्या तु लक्ष्यतेऽण्वी बृहत्यपि । यावत्यः कर्मगतयो यादृशीर्द्विजसत्तम ॥२०॥ यस्मिन्कर्मसमवायो
यथा येनोपगृह्यते । गुणानां गुणिनां चैव परिणाममभीप्सतां ॥२१॥ भूपातालककुब्व्योमग्रहनक्षत्रभू
भृतां । सरित्समुद्रद्वीपानां संभवश्चैतदोकसां ॥२२॥ प्रमाणमण्डकोशस्य बाह्याभ्यन्तरभेदतः ॥ महतां
चानुचरितं वर्णाश्रमविनिश्चयः ॥२३॥ अवतारानुचरितं यदाश्चर्यतमं हरेः । युगानि युगमानं च धर्मो
यश्च युगे युगे ॥२४॥ नृणां साधारणो धर्मः सविशेषश्च यादृशः । श्रेणी
णां राजर्षीणां च धर्मः कृच्छ्रेषु जीवतां ॥२५॥ ॥

समुदायः केन कर्मसमुदायेन कथं कृतेन कोऽपि कारी देवादिभावं प्राप्नोतीत्यर्थः ॥२२॥ भ्वादीनां संभवः एतानि
ओकांसि गृहाणि येषां तेषां संभवः ॥ पश्चेति सर्वत्रानुषंगः वर्णानामाश्रमाणां च विनिश्चयः ॥२३॥ युगे युगे प्रतियुगं ।
यो धर्मः यच्च हरेरवतारानुचरितं ॥२४॥ सविशेषः वर्णाश्रमनिबंधनः श्रेणीनां तद्व्यवसायोपजीविनां व्यव ।
हारनियमलक्षणो धर्मः राजर्षीणां प्रजापालनाधिकारिणां कृच्छ्रेषु आपत्सु जीवतां ॥२५॥ तन्त्रस्वभावैर्निर्धारः २

प्रकृत्यादीनां १

सर्वेषां तत्त्वानां परिसंख्यालक्षणोऽस्वरूपं हेतुर्नील लक्षणानन्तर्कं यदहं तत्तेन लक्षणमित्यर्थः प्रकृत्यादीनां तस्य विविधि-
देवपूजाप्रकारो ष्टांगयोगस्य विधिः ॥ १९ ॥ योगीश्वराणामादिनाथ्यर्विरागतिः लिंगशरीरस्य भंगः प्रलयो वेदा
ऋग्वेदादयः उपवेदा आयुर्वेदादयः ॥ धर्मोऽधर्मेण स्थानि तेषां इतिहास पुराणयोश्च गति ॥ २० ॥ संभवो लक्षल
यः यद्वा तस्य कल्पवनं समुद्भवः विक्रमः स्थितिः प्रति संक्रमः महाप्रलयः दृष्टवैदिकं कर्म पूर्तं स्मार्तं वा
पीकूपतडागादि देवता यतनात्वि च श्रद्धानमारामः सर्वमित्यभिधीयते इति तत्रच काम्यानामगिह
तत्त्वानां परिसंख्यानं लक्षणं हेतुलक्षणं प्रकृत्यादीनां देवयोगस्याध्यात्मिकस्य च ॥ १९ योगीश्वरै
श्वर्यगतिर्लिंगभंगस्तु योगिनां ॥ वेदाश्च वेद धर्माणामितिहासपुराणयोः २० ॥ संभवः सर्वभूतानां विक्र
मः स्थितिसंक्रमः ॥ दृष्टापूर्तस्य काम्यानां विधिर्यश्च ... ... यश्च सं
भवः ॥ आत्मनोऽनंगसः ... ॥ २१ ॥ ... माययाः ॥
विसृज्य वर्ण्यया ... ॥ २२ ॥ ... तत्त्वनो हैं
स्मृदाहर्तुं ... पवै ... निष्टवेदा
... ॥ २३ ॥ ॥ पूर्वजैः कृतम् २४ ॥

... दीनां विधिः प्रतिरोधप्रकार ॥ २१ ॥ ... ॥ ... दं यत्सोत्त
नि ... ॥ २२ ॥ उदासीनं ... ॥ २३ ॥ ... नाव
दया सक्रमेण ... ॥ परेशेति यद्वा ... विदि
त्वाह परेशेति ॥ २४ पूर्वैर्षा एवं जैर्यत्कृतं ... ननु तत्त्वान ... ग्या

सं २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰
भाद्वि॰
टी॰
३१

नप्रायंतितावद्कंतिनागकंतिन आकुलीभवंतीत्यर्थः अच्युतकीर्तिपीयूषं पिबन ॥२७॥ उपामंत्रितः इष्टः संख्यासो
पतिः सात्वतस्य ॥२८॥ ब्रह्मकल्पे सह उपक्रमकल्पे श्रीभगवताख्येनेन प्रश्नानामुत्तरं दातुमुपक्रांतवानित्यर्थः ॥२९॥ पाद्म
नाम ऋषभः श्रेष्ठः आनुपूर्व्येणेति प्रस्तावक्रमो वैदिकविधिनः नवसर्गक्रमः ॥३०॥ द्वितीयेष्टमः ॥८॥ ॐ अत्र प्रश्नेन
वदत्यन ब्रह्मणो हिरण्यादित्येकया यामास नवमे शुको भागवतं पुनः नवयज्ञावडूक्तं यदथानुमत इत्यत्र न
जीवस्य कथं देहसंबंध इति तत्रोत्तरमाह ॥ आत्मेति आहे मायाम् तेनाणा अनुभवरूपस्यात्मनः ॥ अर्थेन दृश्ये

नभसर्वंपवायंतिब्रह्मत्वतत्रशानादमी ॥ पिबंतो अच्युतपीयूषमन्यत्र ऊपितादितान ॥३१॥ सूत उ॰ सइयामंत्रि
तो राज्ञा कथायामिति सत्पतेः ब्रह्मदानोभूः समदि ॥ प्राह भागवतं नाम पुराणं
ब्रह्मसंमितं ॥ ब्रह्मणे भगवत्प्रोक्तं ब्रह्मकल्प उपागते यद्यत्परीक्षिद् ऋषभः पांडूनामनुपृच्छति ॥ या
नुपूर्व्येण तत्सर्वमाख्यातुमुपचक्रमे ॥३०॥ इति श्रीभागवते द्वितीये टीकायां ष्टमोध्यायः ॥८॥ श्रीशुक उ॰ ॥ आत्ममा
यामृते राजन्परस्यानुभवात्मनः ॥ न घटेतार्थसंबंधः स्वप्नद्रष्टुरिवांजसा ॥१॥ बहुरूप इवाभाति मा
यया बहुरूपया रममाणो गुणेष्वस्या ममाहमिति मन्यते ॥२॥ यर्हि वाव महिम्नि स्वे परस्मिन्कालमा

नूरेहादिनासंबंधः ॥ अंतर्गतं न तत्त्वतो न यं तत्र हेतुः परस्य निरस्तभेदे देहसंबंधो न घटते तत्त्व संसारोपि मायैवेत्याह ब
हुरूपो बालयुवादिरूपो देवनरादिरूपश्च आभाति गुणेषु देहादिषु अत एव भक्तियोगेन तन्निरासस्तमोदोषावृटते
इत्यत आह ॥ यहीति वाव यदा हि एवार्थे स्वे महिम्नि प्रदारमेत तदेवाह कालमाययोः पुरुषप्रकृत्योः परस्मि
न्नूतदा अभयं अहं ममेति चत्यक्त्वा उदास्ते एवं स्वरूपेण वर्तते ॥ तदुक्तं यया संमोहितो जीव आत्मानं त्रिगुणा
त्मकं परोपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे लोकस्याजानतो वि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मध्योक्तं परमेश्वरस्याविद्यासंबंधाविशेषात्कथं तद्वत्त्यामोहः स्यादिति आसीद्यदुदरात्पद्ममित्यादिना तत्राह ॥१॥
छा १

आत्मनो जीवस्य तत्त्वविशुद्ध्यर्थं तत्त्वज्ञानार्थं तद्भवतो वा किं तत ॥ यत्तपआदिना भजनेन भवान्नवृत्तोऽस्मात् किं कुर्वन्नातेसत्व विद्धत्तं रूपं दर्शयत ॥ दर्शनेदं तु अव्यलीकेन व्रतेन तपसा प्राप्तः सेवितः सत्तत्त्वं भावः जीवस्याविद्यया मिथ्यारूपं देहसंबंधः ईश्वरस्य तु योगमायया विद्धत्तलीलाविग्रहाविर्भाव इति महान्विशेषः अत एव जनात्मोऽस्य पपन्निरितिभावद्वयत्वादेव तत्त्वज्ञानमिति प्रपंचयिष्यन्नेवम्मतोऽपि तज्ज्ञानेन तत्प्रसादादेवेति दर्शयितुमितिहासमाह सद्व्यादिना ॥ परो गुरुः ॥ भक्तिरहस्योपदेष्टा स्वधिष्ण्यं पद्ममास्थाय अधिष्ठाय तां वेषणायत्नेन निमग्नः पराहृत्य स्वधिष्ण्ये स्थितेत्यर्थः
अधिष्ठाय तस्था १

आत्मतत्त्वविशुद्ध्यर्थं यदाह भगवानृतं ॥ ब्रह्मणे दर्शयन् रूपमव्यलीकव्रतादृतः ॥४॥ स आदिदेवो जगतां
परो गुरुः ॥ स्वधिष्ण्यमास्थाय सिसृक्षयैक्षत ॥ तां नाध्यगच्छद्दृशमत्र संमतां प्रपंचनिर्माणविधिर्यया भवेत् ॥
५ ॥ स चिंतयन् द्व्यक्षरमेकदांभस्युपाशृणोद्द्विर्गदितं वचो विभुः ॥ स्पर्शे
छा २ – षु यत्षोडशमेकविंशं निष्किंचनानां नृप
यद्धनं विदुः ॥६॥ ॥

चिन्तू २

एवं तत्कथं स्रष्टव्यमित्यालोचितवान् ॥ तां दृशं अज्ञातां मत्रस्यां स्थितिविषये संमतामव्यभिचारिणीं विधिः प्रकारः सृ ५
ष्टिं चिंतयन् कर्त्तव्यत्वेन वर्तमाने सत्युपाश्रुणोत् ॥ स्वसमीपे श्रुतवान् तेग्रहत्वेन दर्शयति ॥ वाक् यो मातृवर्णानां स्प
र्शाः तेषु षोडशं तकारः यच्चैकविंशं पकारः तपसा निर्दिष्टार्थं तदर्थमाह हे नृप निष्किंचनानां धनानां धनं तप
स्थितः येन तयोऽर्थं इति प्रसिद्धाः तत्र द्विर्गदितं तप तपेति ॥ तो मम श्रुणोः क वेकवचनं तस्यावीप्सा सादरविधि
रूपामश्रुणोदित्यर्थः ॥ ६ ॥ सर्वत्रैव टीकास्य ६ ॥ " ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा॰ द्वि॰ टी॰ २२ एवं निशम्य तद्वचो वक्तुर्दिदृक्षया ततः प्रवलितः सन् । दिशो विलोक्य पुनः स्वधिष्ण्यमास्थाय केनचिन्मन्त्र्यस्तं विष्णु
नैव तन्ममोपदिष्टं विमृश्य पुनस्तपसि मनो धृतवानित्यर्थः ॥ ६ ॥ ततश्च सर्वलोकानां तापनं प्रकाशकं तपः अतप्य
त कृतवान् । तपतां तपस्विनां वरो श्रेष्ठो दिव्यं वर्षाणां सहस्रं जितः श्वासो मनश्च येन विजितानि उभयेन्द्रियाणि ज्ञा
नकर्मात्मकानि येन ततः तपतां तपः परं तपो यस्य स तपीयान् अतिशयेन तपस्वी ॥ ७ ॥ तस्मै ब्रह्मणे स्वलोकं वैकुण्ठाख्यं परं श्रे
ष्ठं न यस्य परं यतः परमन्यदुत्कृष्टं नास्ति तमेव लोकं सम्यग्वर्णयति पञ्चभिः व्यपेताः संक्लेशादयो यस्मात् ॥ स्वदृ

निशम्य तद्वक्तृदिदृक्षया दिशो [illegible] विलोक्य तत्रान्यदपश्यमानः । स्वधिष्ण्यमास्थाय विमृश्य तद्धितं तप
स्युपादिष्ट इवादधे मनः ॥ ६ ॥ दिव्यं स[illegible]हस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेन्द्रियः । अतप्य
त स्माखिललोकतापनं तपस्तपीयांस्तपतां समाहितः ॥ ७ ॥ तस्मै स्वलोकं भगवान्सभाजि
तः संदर्शयामास परं न यत्परं । व्यपेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भिर्विबुधैरभिष्टुतं ॥ ८ ॥ प्र
वर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः । न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरा
सुरार्चिताः ॥ ९ ॥ श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशसः । सर्वे चतुर्बाहव उन्मिष
न्मणिप्रवेकनिष्काभरणाः सुवर्चसः ॥ ११ ॥

स्वदृष्टवद्भिः स्वदृष्टवद्भिः यद्वा स्वस्य दर्शनं समस्ति येषां आत्मविद्भिरित्यर्थः ॥ ८ ॥ ताभ्यां मिश्रं सत्त्वं च न प्रवर्तते किंतु शुद्धमेव
सत्त्वं कालविक्रमो नाशः अपरे रागलोभादयो न सन्तीति किमुत वक्तव्यं अनुव्रताः पार्षदाः ॥ ९ ॥ श्यामा
श्यामावदाताः उज्ज्वलाः पीनांबराः सुरुचः अतिकमनीयाः सुपेशसः अतिसुकुमाराः ॥ १० ॥
उन्मिषन्तः स्वप्रभावेन मणिप्रवेकाः मण्युत्तमा येषु तानि निष्काभरणानि पदकानि ग्रैवेयकानि येषां ते सुव
र्चसः अतितेजस्विनः ॥ ११ ॥

२२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रवालाद्दिवहूर्यो वर्णैर्यथांतेषु विस्फुरंति कुंडलानि मौलयो मालाश्च संति येषां पार्षदाननुवर्ण्य पुनरपि लोकमनुवर्णयति
भ्राजिष्णुभिरिति दीप्यमानाभिः ॥१९॥ प्रमदोत्तमानां दिवः कांतयः ताभिः विद्योतमानः सह विद्युद्भिर्वर्तमानाः सविद्युतः ता
भिरभ्रावलिभिः तत्र विद्युतश्चवस्थिंय ॥ अथ पंक्तुपयश्चवविमानानि नभश्चवल्लोकः श्रीः संपत्तद्रूपिणीं मूर्तिमतीमानंदं जो
विभूतिभिर्नानाविभवैः ॥२०॥ प्रेंखं श्रिता हालनं मंचिता कुसुमाकरो वसंतः तस्यानुगा भ्रमरास्तैर्विविधं गीयमाना स्वयं तु श्रिय

प्रवालवैदूर्यमृणालवर्चसः परिस्फुरत्कुंडलमौलिमालिनः भ्राजिष्णुभिर्यः परितो विराजते लसद्विमानाव
लिभिर्महात्मनां ॥१९॥ विद्योतमानः प्रमदोत्तमाद्युभिः सविद्युदभ्रावलिभिर्यथा नभः श्रीर्यत्र रूपिण्युरुगायपाद
योः करो[illegible]तिभिः ॥२०॥ प्रेंखं श्रिता या कुसुमाकरानुगैर्विगीयमाना प्रियकर्म गायती यत्र
गाविव[illegible]मानी ॥२१॥ स वं ददर्श पुष्कलानं हेममाहेभिः स्वर्णस्तंभमालाभिः परि
सवितं[illegible]नान्वितं[illegible]नानाविधैस्ततनाननं ॥२५॥ किरीटिनं कुंडलिनं चतुर्भुजं
[illegible]वाचं[illegible]दिशं श्रिया ॥२६॥ यादेहाग्रिमसनसमाश्रितं प
[illegible]ख्याउशापश्चतानि भिः ॥२८॥

राम

त्रि
साद्देः कर्मगायंतीमवर्ती ॥१८॥ यएवं भूतो लोकः तत्र तस्मिन् शून्यानां प्रसादेश्च भिर्भुविहंगवामलः ॥ द्रष्टृणां दर्शकं
भ्रमद्दासेभ्रमणात्तावनंतं ध्यानं नंदयस्य ॥१९॥ वनांशिक्षितन याचश्रिया लालित्यमलेहालनं उत्पर्णः य ध्यहि एणी यं वि
हंसिंदासतेवतमः प्रकृतिपुरुषमहदहंकाराः तन्मात्रापाः षोडशैकादशेंद्रियाः महाभूतान्याः पंचतन्मात्ररूपाः
याः प्राकृयः नाभिश्चेतद्रू

श्री
भाग
द्वि
३३

चित्रैर्वैः स्वभाविकैर्वैश्वर्यादिभिः इतरत्र योगिषु अध्रुवैरागंतुकैः असाधारणैरित्यर्थः एवं सत्यपि स्वएव धामन्स्वस्वरूपे
एव ब्रह्माणं रमुत एवं स्वेरतस्य दर्शनेन पश्चाह्लादः तेन परिप्लुतं व्याप्तमंतरं मनः करणं यस्य हृष्यंती रोमांचिता तनु
र्यस्य प्रेमभरेण अश्रूणि लोचने यस्य ॥१६॥ विश्वसृट् स्वलापाम हंस्येन पथा ज्ञानपथ्या ज्ञानमार्गेण ॥१७॥ नं ब्रह्माणं भ
गवान् बभाषे प्रजासर्गकार्यं निजशासनार्हणं स्वनियोगार्हं प्रजाविसर्गे समुपस्थितमिति वान्वयः ईषत्स्मिते
न शोचिषा दीप्त्या युक्तया गिरा सस्मितहस्तेन ॥१८॥ चिरं संभृतेन तपसाहं सम्यक्तोषितः दुस्तोषः तोषयि २

पुरुषं भगः स्वैवितरत्र वाध्रुवैः स्वएव धामन्रममाणमीश्वरं तद्दर्शनाह्लादपरिप्लुतांतरो हृष्यत्तनुः प्रेमभरा
श्रुलोचनः ॥१७॥ ननाम पादांबुजमस्य विश्वसृक् यत्पारमहंस्येन पथाधिगम्यते ॥१८॥ तं प्रीयमाणं समुपस्थि
तं तदा प्रजाविसर्गे निजशासनार्हणं बभाष ईषत्स्मितशोचिषा गिरा प्रियः प्रियं प्रीतमनाः करे स्पृशन्
॥१९॥ श्रीभगवानुवाच ॥ त्वयाहं तोषितः सम्यग्वेदगर्भ सिसृक्षया चिरं भृतेन तपसा दुस्तोषः कूटयोगिनाम् २०
वरं वरय भद्रं ते वरेशं माभिवांछितं ॥ ब्रह्मंछ्रेयः परिश्रामः पुंसां मद्दर्शनावधिः ॥२१॥ मनीषितानुभावो
ऽयं मम लोकावलोकनं यदुपश्रुत्य रहसि
चकर्थ परमं तपः ॥२२॥

तुमशक्यः ॥२०॥ मा इति मां श्रेयसां फलानां परिश्रामः साधनश्रयासः मम दर्शनमवधिर्यस्य सतथाऽतो यि केनु
न पुनः फलमस्तीत्यर्थः एतच्च मत्कृपयैव त्वया प्राप्तमित्याह ॥२१॥ मनीषितसिद्ध्यानुभ्यमिदं दातव्यमिति ।
या ममैकांतस्यानुभावो ऽयं कोऽसौ तमाह ममलोकस्यावलोकनं यत् । नेदं ममैव तपोबलेन प्राप्तमिति
स्वांते ऽयं मन्यस्व तत्र हेतुः तेनापि मत्कृतत्वादित्याह यद्रहसि तपतपेति यद्वचः उपश्रुत्य परमं तपः चक

३३

तदपि त्वां प्रणिमये वादि दृष्टमुपदिष्टं ॥ कदा न त्वं तदा मयस्त्वां वंभेनवयिक कर्माणि कार्येर्यो विमोहितेत सतिकिंचनयेनामस्यमेव
प्राक्तिं विल्वाद ॥ नयोमे हृदयमंतवंगा प्राक्तिः प्रात्मास्व रूपं यस्मात्तानमयंतपदइतिष्के तेः २३ ॥ अमामिसंदृष्टाभिविमर्यपाल
यामिवीर्यं शक्तिः ॥ २४ प्रथमस्तोः पिष्ठानाग्रहायांवुद्दोप्रवुस्थितः यद्यपि वेदत याप्युत्तरेणान्वयः ॥ २५ ॥ नाथमानस्य
याचमानस्य उपतप्यमानस्येतिवानाथनायय ॥ अमंशुयंप्रयच्छनाथितंयाचितं ॥ नाप्रनाधृष्याद्योपतायेभ्रुयाशीषु
नाथितमेवाद ॥ परेस्व त्वंस्थवंस्थलंवतेन पयथा जानीयां ॥ २६ ॥ यथावत्कोऽस्मित याताद्दिषयामनीषामयिदेहीनु

प्रन्यादिष्टंमयानत्रत्वयिकर्मविमोहिते ॥ तयोमिहृदयंमादात्मा हंतपसोनच ॥ २३ ॥ सृजामितपसैवेदं
ग्रसामितपसापुनः ॥ बिभर्मितपसाविश्वंवीर्यमे दुस्तपं नपः ॥ २४ ॥ ब्रह्मोवाच भगवन्सर्वभूतानामध्यक्षोवस्थि
तोगुहां वेदह्यप्रतिरुद्धेन प्रज्ञानेनचिकीर्षितं ॥ २५ तथापिनाथमानस्य नाथनाथयनाथितं परावरेयथा
रूपेजानीयांतेत्वरूपिणः ॥ २६ ॥ यथात्ममायायोगेननानाशक्त्युपबृंहितं विलुम्पन्विसृजन्गृह्णन्बि
भ्रदात्मानमात्मना २७ ॥ क्रीडस्यमोघसंकल्पऊर्णनाभिर्यथोर्णुते ॥ तथा तद्विषयांधेहिमनीषांमयिमाधव
२८ ॥ भगवच्छिक्षितमहं करवाणिह्यतन्द्रितः ॥ नेहमानः प्रजासर्गंबध्येयं य
दनुग्रहात ॥ २९ ॥ राम ॥ राम
राम

नेवणान्वयः नानाशक्त्युपबृंहितं विश्वं विलुम्पन्संहरन् ॥ विविधंसृजन बिभ्रत्यालयन ॥ आत्मनास्वयमेवात्मानं
ब्रह्मादिरूपंगृह्णन ॥ २७ ॥ क्रीडसि ऊर्णुते ः तंतुभिरात्मानमाच्छादयति ॥ तात्किं स्पष्टेरुद्दिश्य वंतत्वज्ञानप्रार्थयसे २८ नेमाह ॥
भगवतानयाशिक्षितमनुष्ठिं हेप्रतंदितः अनलसः सनक विध्यामितर्हि किमनेन तत्वज्ञानेनतत्राह ॥ यस्मादेवं
भूतान्नवानुग्रहात्प्रजासर्गमीहमानः कुर्वन्नपि अहंकारादिभिर्वद्धो न भवेयंस्तुति ॥ २९ ॥ ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाटि टी ३४

प्रवेशं च मदो भविता सन्तर्कविन्कोत्तमा भूदिति प्रार्थयन् यावदिति ॥ भो ईशानेन्वयाल्लौकिकस्य सख्युः सखेवादेशकृतः ।
कस्यश्रीगादिना ममत्वेन संमानितः सन्प्रजासर्गे रूपतत्त्वपरिकर्माणि मे वायो स्थितः । प्रविक्लवः प्रव्याकुल एव यावज्जने
विभजामि तत्र ममन्यथामादिभेदेन सत्त्वजामिनावद्धमानादहमप्यजः स्वतन्त्र इति मानिनो मे समुन्नद्ध उत्कटो मदो माभूत्
यद्वा मदो मा समुद्बद्ध मा समुन्नद्धतां अद्दृक्रोधनभवेदित्यर्थः ॥ २९ ॥ ज्ञानं परमिताक्के विज्ञानमनुभवः बहस्यं भक्तिः ॥ तदंगाप्यम
पि वदामीति निर्दिशति ॥ तस्यांगमाथते ॥ ३ ॥ यावानस्व रूपतः यथाभावो यादृक्सत्त्ववान् यानि रूपाणि गुणाः ॥ कर्माणि

याव
ज्ञात्वा मसख्युर्विदशतेष्टकृतः प्र
जाविसर्गे विभजामि भोजनं प्रविक्लवस्तेपरिकर्मणि स्थितो मा मे समुन्न
द्धमदोऽजमानिनः ॥ २९ ॥ श्रीभगवान् ॥ ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितं
सरहस्यं तदंगं च गृहाण गदितं मया ॥ ३० ॥ यावानहं यथा भावो यद्रूपगु
णकर्मकः तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥ ३१ ॥ अहमेवासमे
वाग्रे नान्यद्यत्सदसत्परं पश्चा
दहं यदेतच्च योऽवशिष्येत
सोऽस्म्यहं ॥ ३
२

वयस्यैतदेव सम्यक् उपदिशति ॥ यावानित्यस्यार्थं स्फुटयति ॥ ३२ ॥ अहमेवाग्रे सृष्टेः पूर्वमासं स्थितः नान्यत्किंचित
यत्सत्तत्स्थूलं यदसत्तत्सूक्ष्मं च तयोः परं कारणं प्रधानं ॥ तस्याप्यंतर्मुखतया तदा मय्येव लीनत्वात् ॥ [illegible]
[illegible] अहमेव तदासमेव केवलं न चान्यत्करवं पश्चात्सृष्टेरनंतरमप्यहमेवास्मि यदेतद्विश्वं तदप्यहमस्मि
प्रलयेऽवशिष्येत सोऽप्यहमेवानेन चानाद्यनंतत्वाद्द्वितीयत्वात्परिपूर्णोऽहमित्युक्तं भवति यथात्ममायायोगेनान्येन

ऋतेर्थंविनापिवास्तवमर्थंयद्यतः किमप्यनिरुक्तमात्मन्यधिष्ठानेप्रतीयेतसदपिचनप्रतीयेतनदात्मनोममायांवि
यात्॥ यथाआभासोद्विचंद्रादिरित्यर्थंविनाप्रतीतौदृष्टांतः॥ यथातमइतिसतोप्रतीतौभूतेषुयथाभासइत्येतत्स्पष्टयु
ति॥ असतःप्रतीतौदृष्टांतोद्विचंद्रः वस्तुतस्तुमिथ्यासतःप्रतीतौदृष्टांतः॥ तमोराहुर्यथाग्रहाणांमध्येसन्नपिनप्रती
यतेराहुरदृष्ट्योय यति॥३४॥ यथामहांतिभूतानिभौतिकेषुअनुसृष्टेरनंतरंप्रविष्टान्युपलभ्यमानत्वात्॥ अप्रविष्टानिच
प्रागेवकारणात्मयातेषुविद्यमानत्वात् तथातेषुभूतभौतिकेषुअहंनचतेष्वहं॥ एवंभूताममसत्तेत्यर्थः सायत

ऋतेर्थंयत्प्रतीयेतनप्रतीयेतचात्मनि॥ तद्विद्यादात्मनोमायांयथाभासोयथातमः॥३४॥ यथामहांतिभूता
निभूतेषूच्चावचेष्वनुंप्रविष्टान्यप्रविष्टानितथातेषुनतेष्वहं ३५ एतावदेवजिज्ञास्यंतत्त्वजिज्ञासुनात्मनः
अन्वयव्यतिरेकाभ्यांयत्स्यात्सर्वत्रसर्वदा॥३६॥ एतन्मतंसमातिष्ठपरमेणसमाधिना॥ भवान्कल्पविक
ल्पेषुनविमुह्यतिकर्हिचित्॥३७॥ श्रुकः संप्रदिश्यैवमजनोजनानांपरमेष्ठिनं॥ पश्यतस्तस्यतद्रूपमा
त्मनोन्यरुणद्धरिः॥३८ अंतर्हितेंद्रियार्थायहरयेविहितांजलिः॥ सर्वभूतमयोविश्वंसस
र्जेदंसपूर्ववत्॥३९॥॥ श्रीराम

माह॥३५॥ आत्मनस्तत्वजिज्ञासुनाएतावदेवजिज्ञास्यंविचार्यंतदेवाह॥ अन्वयःकार्येषुकारणत्वेनानुवृत्तिःकारणा
वस्थायांचतेभ्योव्यतिरेकः तथाजाग्रदाद्यवस्थासुतत्तत्कार्येषुसाक्षितयान्वयः व्यतिरेकश्चसमाध्यादौनि
जस्वरूपेणावस्थानात् कार्येभ्योव्यतिरेकः जाग्रदाद्यवस्थासुकार्येषुसाक्षितानात्॥ एवमन्वयव्यतिरेकाभ्यांय
त्स्यात्सर्वत्रसर्वदातदेवात्मेति॥ इयंचतुःश्लोकीश्रीभागवतरहस्योत्पत्तिभूता अधुनायत्प्रार्थितंतेनेहमानःप्रजा
सर्गमितितत्प्रसादीकरोति॥३६॥ एतन्मतंसम्यगनुतिष्ठसमाधिनाचित्तैकाग्र्येणकल्पेषुविकल्पाःविविधाःसृष्ट
यः तेषुविमोहंकर्तृत्वाभिनिवेशंनयास्यतीति॥३७॥ एवंतंसंप्रदिश्येत्यादिअजजनानांपरमेष्ठिनंपरमेष्ठ्याधिपत्ये।

श्री
भा० टी०
९५

तदेवं तेन एवं उक्तो वक्तुं नारदस्य वारः ॥ प्रवृत्त इत्याह प्रजापतिरिति नियमैर्यमैः प्रजानां भद्रमन्विच्छन्नविमृश्य तान्नेव स्वार्थकाम्यया स्व
प्रयोजनेच्छानयायमनियमान् अहिंसासत्यादयो यमाः शौचसंतोषतपआदयो नियमाः तानन्वतिष्ठत् ॥४०॥ रिक्थादानां पुत्रा
णां मध्ये प्रियतमः तेषिनरं सेवमानः शीलादिना परितोषयामास किमिच्छन् विष्णोर्मायां विविदिषन् ॥४१॥ विष्णुमायाशुद्धज्ञानेच्छ
थः मां मा ॥ ४२ ॥ भगवतानुः प्रोक्तां प्रसंदेपेणोक्तं विस्तरेण निलक्षणीयाद्यर्थैः विवृतं तस्मिंस्तत ॥ तस्मै प्रदाय तं भागवतं म

येरुषु २ ह दश लक्षणं

प्रजापतिर्धर्मपतिरेकदा नियमान्यमान् ॥ भद्रं प्रजानामन्विच्छन्नातिष्ठत्स्वार्थकाम्यया ॥४०॥ तं नारदः प्रियतमो रिक्थादा
नामनुव्रतः शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ॥४१॥ मायां विविदिषन्विष्णोर्मायेशस्य महामुनिः महाभागवतो राजन्पितरं
पर्यतोषयत ॥४२॥ तुष्टं निशाम्य पितरं लोकानां प्रपितामहं देवर्षिः परिपप्रच्छ भवान्यन्मानुपृच्छति ॥४३॥ तस्मा इदं भाग
वतं पुराणं दशलक्षणं प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत ॥४४॥ नारदः प्राह मु
नये सरस्वत्यास्तटे नृप ॥ ध्यायते ब्रह्म परमं व्यासाया
मिततेजसे ॥४५॥ यदुताहं त्वया पृष्टो वैराजात्पु
रुषादिदं ॥ यथासीत्तदुपाख्यास्ये प्रश्ना
नन्यांश्च कृत्स्नशः ॥४६॥ इति
द्वितीये नवमः ॥९॥

याख्यानं इत्याशयेनाह ॥ नारद इति ॥४५॥ भागवत व्याख्यानेनैव त्वत्प्रश्नानामनुत्तरं दास्यामीत्याह यदुतेति ॥४६॥ पुरुषावयवैर्लो
काः सपालाः एवं कल्पिता इत्यादिना वैराजात्पुरुषात् यथावैराजात्पुरुषादिदं वि
श्वं कथमासीदिति यदहं त्वया पृष्टः तद्यथावदुपाख्यास्यामि शृण्विति शेषः ४६ इति द्वितीये नवमः ततो भागवतं व्याख्यास्यन्तं
वदप्रामेस्फुटं ॥ राजप्रश्नोत्तरं वक्तुं मारेभे बादरायणिः दशलक्षणं प्राहेत्युक्तं तानि दशलक्षणानि अनुवर्णयति अत्रेति १ भा०
९५

पुराण

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दशालन्तास्याह अत्रेति अत्राशदीयस्य विश्लेषः पुरुषस्वीकारः सर्गः १ पुरुषाद्ब्रह्मादीनामन्यानि विसर्गाः २ तेषामाधाराः विश्वानि तानि ३ स्थितानामभिवृद्धिः पोषणं ४ पुष्टानामाचारकृतिः ५ तत्रापि सदाचारो मन्वन्तरं ६ तत्रापि विष्णुभक्तकथाः ईशानुकथा ७ विष्णुभक्तानां प्रपंचाभावो निरोधः ८ निष्प्रपंचानां स्वस्वरूपलाभो मुक्तिः ९ मुक्तानां ब्रह्मवत्स्वरूपेणावस्थानमाश्रयः १० मन्वन्तराणि ईशानुकथाश्चेति द्वंद्वः सर्गादयो दश धर्माः लक्षितयत्र तत्तदाख्यानं तत्तत्सनात्पर्यं ततस्तेषु वर्णनं नत्वेवमर्थभेदात् शास्त्रभेदः स्यादित्यत आह दशमस्याश्रयस्य विशुद्ध्यर्थं तत्त्वज्ञानार्थं नवानां लक्षणं स्वरूपप्रकाशैव प्राधान्यात् आयदोषदत्यर्थः नन्वत्रानेवश्रुतौ।

श्रीशुकः अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः। मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥ १ ॥ दशमस्य
विशुद्ध्यर्थं नवानामिह लक्षणम्। वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा ॥ २ ॥ भूतमात्रेन्द्रियधियां
जन्म सर्ग उदाहृतः। ब्रह्मणो गुणवैषम्याद्विसर्गः पौरुषः स्मृतः ॥ ३ ॥ स्थितिर्वैकुण्ठविजयः पोषणं त
दनुग्रहः। मन्वन्तराणि सद्धर्म ऊतयः कर्मवासनाः ॥ ४ ॥ अवतारानुच
रितं हरेश्चास्यानुवर्तिनाम्। पुंसामीशकथाः प्रोक्ता नाना
ख्यानोपबृंहिताः ॥ ५ ॥

यदेतत्तस्याह श्रुतेन श्रुत्यैव श्रुत्यादिस्थाने स्वयं साक्षात् तदर्थोपयोगीति अर्थेन तात्पर्यवृत्त्या तत्तदाख्यानेषु सर्गादीनां प्रत्येकलक्षणमाह भूतानि आकाशादीनि मात्राणि शब्दादीनि इन्द्रियाणि धीः ब्राह्मेत्तु महदहंकारो गुणानां वैषम्यात् परिणामात् ब्रह्मणः परमेश्वरात्कर्तुः भूतादीनां यद्विराड्रूपेण स्वरूपतश्च जन्म स सर्गः पुरुषो विराजः तत्कृतः पौरुषः चराचरसर्गो विसर्गः ३ वैकुण्ठस्य श्रीभगवतो विजयः उत्कर्षः सृष्टानां तत्तन्मर्यादापालनेन तत्कृतः स्थितिः स्थानं स्वभक्तेषु तस्यानुग्रहः पोषणं तदनुग्रहीतानां सतां मन्वन्तराधिपतीनां धर्मः कर्मणां वासनाः ऊतयः कर्मभिर्विधेयः तेन तेन समतानेन ऊयन्ते कर्मभिः संतन्यन्ते इति ऊतयः ४ हरेरवतारानुचरितं अस्यानुवर्तिनां च सन्कथाः ईशानुकथाः प्रोक्ताः संक्षिप्यन्ते इति वा ऊतयः इत्यर्थः ४ हरेरवतारानुचरितं अस्यानुवर्तिनां चसत्कथाः ५ ईशानुकथा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी ३६ द्वि॰ हितवा॰

अस्यात्मनो जीवस्य हरेर्योगनिद्रामनु पश्चाच्छक्तिभिरुपाधिभिः सह शयनं लयः निरोधः अन्यथारूपमविद्यया
ध्यस्तं कर्तृत्वादि हित्वा स्वरूपेण ब्रह्मतया व्यवस्थितिर्मुक्तिः ॥६॥ आभासः सृष्टिः निरोधो लयश्च यतो भवति अध्यवसीय
ते प्रकाशते च स ब्रह्म परमात्मेति प्रसिद्ध आश्रयः। कथ्यते आश्रयस्वरूपमपरोक्षानुभवेन स्पष्टं दर्शयितुं पुरुषस्याध्या
त्मादिविभागमाह ॥७॥ योऽयमध्यात्मिकः पुरुषः चक्षुरादिकरणाभिमानी द्रष्टा जीवः चक्षुराद्यधिष्ठाता सूर्यादिः स एवाधिदैविकः ८
तैरेकस्मिन्नेवोभयाद्विरूपो विच्छेदो यस्मात्स आधिभौतिकः। चक्षुर्गोलकाद्युपलक्षितो दृश्यो देहः पुरुषः इ
ति पुरुष[illegible]स्य जीवस्योपाधिः सर्वोऽप्येषु पुरुषोत्रयस्य मयरं तास्त्विकतः ॥८॥ एवमेकतराभावेऽत्पत्तेषाम
न्योन्यसापेक्षसिद्धित्वेन नानात्मत्वं दर्शयति त्रितयमिति दृश्यं विना तत्प्रतीत्यनुमेयं करणं न सिध्यति ॥ नापि द्रष्टा न।

निरोधोस्यानुशयने स्वरूपे।
आत्मनः सह शक्तिभिः मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्य
वस्थितिः ॥६॥ आभासश्च निरोधश्च यतस्त्वाध्यवसीयते स आश्रयः परं ब्रह्म
परमात्मेति शब्द्यते ॥७॥ योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः यस्तत्रोभयवि
च्छेदः स स्मृतो ह्याधिभौतिकः ॥८॥ एकमेकतराभावे यदा नोपलभामहे
त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ॥९॥ राम

चतत्कारणं विना करणप्रवृत्त्यनुमेयस्तदधिष्ठाता सूर्यादिः न च तं विना करणं प्रवर्तते। न च तद्विना दृश्य।
मित्येकेतराभावे एकेनोपलभामहे तत्र तदा तत्त्रितयं आलोचनात्मकेन प्रत्ययेन यो वेद स आत्मा चित्तया पश्य।
ति। स परमात्मा आश्रयः तेषामपि परस्परं आश्रयत्वमस्त्येवेति तद्व्यवच्छेदार्थं विशेषणं स्वाश्रयः अनन्याश्र।
यः। स च स्वाश्रयोऽन्येषामाश्रयश्चेति। तथा च भगवानेवेति रूपमार्कं वपुरेवं पश्यन्त्व सिध्यति यः स्वतः स्व
आत्मावस्थाभ्यामपरोक्षा। आद्यः स्वयमनुभूत्याविर्लासिद्धिरिति। एतेन वक्ष्यमाणविचारेण तेषां सम्यग्भयत्वमप्युक्त
म॥ अत्र एव पुरुषाणां यत्वेन लोकस्य पाताः एवं कल्पिताः लोके रुपाध्यायवः स पातीत्यनेनैव काविशाथो

सिद्धिहितः ३६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

उक्तमेवाध्यात्मादिविभागं प्रपंचयन् यदुत्पादनया एष्टेवैराजात्पुरुषादिदं अध्यासीत्तदुपाख्यास्य इति प्रतिज्ञाते तदुत्पत्ति
प्रकारमाह पुरुषो वैराजः अण्डं विनिर्भिद्य यदा पृथक्कृत्य विनिर्गतः पृथक्कृत्य स्थितः इत्यर्थः अयनं स्थानमन्विच्छन् विशु
द्धान् यतः शुचिः स्वयमतः शुचीः शुद्धा अपः गर्भोदकसंज्ञा अस्राक्षीदसृजत् अप्स्ववासेन नारायणनामनिरुक्तिं स्पष्टयति
नास्विति तेनाप्सु वासेन यस्मात्पुरुषो नरः तस्मादुद्भवा यास्ता नाराः नाराः अयनं अस्येति नारायणः तदुक्तं आपो नारा

पुरुषोऽण्डं विनिर्भिद्य यदासौ स विनिर्गतः। आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिः शुचीः ॥१०॥ तास्ववात्सीत्स्वसृ
ष्टासु सहस्रं परिवत्सरान्। तेन नारायणो नाम यदापः पुरुषोद्भवाः ॥११॥ द्रव्यं कर्म च कालश्च स्वभावो जीव एव च
यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया ॥१२॥ एको नानात्वमन्विच्छन्योगतल्पात्समुत्थितः। वीर्यं हिरण्मयं देवो
मायया व्यसृजत्त्रिधा ॥१३॥ अधिदैवमथाध्यात्ममधिभूतमिति प्रभुः। अथैकं पौरुषं वीर्यं त्रिधाभिद्यत तच्छृ
णु ॥१४॥ अन्तः शरीर आकाशात्पुरुषस्य विचेष्टतः। ओजः सहो बलं जज्ञे ततः प्राणो महानसुः ॥१५॥ ॥ ॥

इति श्लोकः आपो वै नरसूनवः अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः इति तस्य प्रभावमाह ॥११॥ द्रव्यं पंचमहाभूतानि
उपादानं कर्मादीनि निमित्तानि जीवो भोक्ता यस्यानुग्रहात् सन्ति कार्यक्षमा भवन्तीत्यर्थः ॥१२॥ योग एव तल्पः शय्या तस्माद्वी
र्यं गर्भरूपं देहं हिरण्मयमिव प्रकाशबहुलं तस्यैव प्रपंचः ॥१३॥ अथैक्यादिना अन्तः शरीरे य आकाशः तस्मात् क्रिया
शक्त्यात्तत्र विविधं चेष्टमानस्य सतः ओजः इन्द्रियशक्तिः सहो मनःशक्तिः बलं देहशक्तिः ततः शक्त्यात्मकात्सूक्ष्मा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा.द्वि.
टी.
५०

मद्नेनेदर्शयति । प्राणा इंद्रियाणि यं प्राणंतं चेष्टां कुर्वंतमनुपश्चं प्राणंति चेष्टां कुर्वंति अपानंतं चेष्टांन्यजंतं अत्र अपानेति
चेष्टांन्यजंतं निराजानमनुभृत्या इव ।१६। दिपनाच्चाल्पनानिनिमित्तेनदाइन्तुद्रांके विराड्जीवाभेदेनोपासनार्थमुक्तं श्रा
नायतेस्मनंतोनदातः भ्रतायितुमिछत दूर्मथः । श्राकृप्रथमेनलिवभियत विभक्तम भृत ।।१७।। नान्तु अपिष्ठानेनिद्र
इंद्रियेनानारसोविषयः । वरुणश्च देवतानान्तानव्या । एवं सर्वत्राधिष्ठानं इंद्रियं देवता विषय इत्यनन्वतुष्टयमनुक्रमेणो
क्तं ।।१८।। विवक्षोर्वक्तुमिछोः मुखनपवबह्निर्देवता वागिंद्रियं व्याहृतिर्भाषणं तयोर्विनींद्रिय देवताधीनत्वकर्मणो

अनुप्राणंतियंप्राणाः प्राणंतंसर्वजंतवः । अपानंतमपानंतिनरदेवमिवानुगाः ।।१६।। प्राणेनाक्षिपता क्षुत्तृ
डंतराजायतेविभोः । पिपासतोजक्षतश्च प्राङ्मुखंनिरभिद्यत ।।१७।। मुखतस्तालुनिर्भिन्नंजिह्वातत्रोपजायते ।
ततोनानारसोजज्ञेजिह्वयायोधिगम्यते ।।१८।। विवक्षोर्मुखतोभूम्नोवह्निर्वाग्व्याहृतंतयोः । जलेवैतस्यसु
चिरंनिरोधः समजायत ।।१९।। नासिकेनिरभिद्येतांदोधूयतिनभस्वति । तत्रवायुर्गंधवहोघ्राणोनसिजिघृक्ष
तः ।।२०।। यदात्मनिनिरालोकमात्मानंचदिदृक्षतः । निर्भिन्नेह्यक्षिणीतस्यज्योतिश्चक्षुर्गुणग्रहः ।।२१।। बोध्य
मानस्यऋषिभिरात्मनस्तज्जिघृक्षतः । कर्णौचनिरभिद्येतांदिशः
श्रोत्रंगुणग्रहः ।।२२।। ।। ।। ।।

दर्शयति । शेषं नभस्वति प्राणवायौ दोधूयति दोधूयमाने प्रचलति सति तत्र नासिकायां वायुर्देवता गंधं वहतीति
तथा नेत्र गंधो विषयो दर्शितः । घ्राणशब्देंद्रियं जिघृक्षतः गंधग्रहीतुमिछतः । निरालोक प्रकाशशून्यमासीदिति
शेषः । निर्भिन्ने भिन्ने विदेकेवह्नावः । नदात्मानं देहं वकाशादन्यत्र वस्तु दिदृक्षतः । अक्षिणी स्थानं ज्योतिः आदित्यो दे
वता चक्षुरिंद्रियं ततो गुणस्य रूपस्य ग्रहः । ग्रहणमनेन रूपं विषयो दर्शितः ।।२१।। ऋषिभिर्वेदैर्बोध्यमानस्य तत्
आत्मनः प्रबोधं ग्रहीतुमिछतः । ततो गुणग्रहः । शब्दग्रहणम् ।।२२।। ।। ।। ।। ।।

५०

लघुत्वं वकाठिन्यं चमृदुत्वं च गुरुत्वं चशाउस्नत्वमीषदुस्नत्वं च शीतत्वं चेत्यर्थः यद्यप्यनुस्नत्वमिंद्रियविषय ए
वतथापितस्यनिक्षत्वाभावात्कोस्नमित्युक्तं गुर्वुस्नेतिपाठेप्यणाद्यपाः कोदम्नःवस्तुतएतान्यर्मान्जिव्हृत्वतः
त्वचः निर्भिन्नातनगिंद्रियाधिष्टानचर्मनातमित्यर्थः तस्यारोमाणि इंद्रियमहीरुहस्त्वदेवताजाताः वस्तुनि
गुरुत्व ४ हस्तेनाघातालिनेलघुत्वयोर्त्तानातयोर्यतगिंद्रियविषयमितियोर्त्रणाकाः तत्रत्वचिश्रंतर्वाहिस्त्ववात्तोद्भूतः
श्रावृत्यस्थितः कर्तविनिहाकथंभूतः त्वचालघ्वोगुणाः स्पर्शोयेनस्पर्शयमर्थः त्वगिंद्रियमेववहिः कंडूतिस
हितंस्पर्शगृहृतान्नलोमशाद्वेनोच्यतेनत्वमहीरुहाणांदेवत्वंश्रंतर्बहिस्त्वस्पर्शगृहृतान्नदेवत्वकृष्णाद्वेनोच्यतेनत्व

वस्तुनोलघुकाठिन्यमृदुगुर्वोष्मशीततां विदुस्त्वचः त्वचि भिन्नास्तस्यारोममहीरुहः ॥२३॥ तत्रत्वांतर्ब
हिर्वायुस्त्वचालघ्वगुणोद्भृतः २४ हस्तोरुरुहस्तस्यनानाकर्मचिकीर्षयात्योस्तुबलवानिंद्रश्रादा
नमुभयाश्रयं ॥२५॥ गतिंजिगीषतःपादोरुरुहात्रेमिकांमुक्तीपद्यात्रः स्वयंहव्यंकर्मभिः क्रियतेत्व
भिः ॥२६॥

त्वचमस्यविनिर्भिन्नांविविशुर्धिं॥ स्पमोषधीः श्रंशेनलोमभिः कंडूर्यैस्मोप्रति
वात्तोदेवतानयाचत्वतीयेदस्पति त्वचमस्यविनिर्भिन्नां लोकपालानि लोविशत् प्राणो नेपूनस्पर्शयेनासौ प्रतिपद्यतेदुतितत्रम
यद्यते इतिनिर्भिन्नास्यसमर्माणिलोकपालानि लोविशत् प्राणोनेपूनसंस्पर्शयेनासौ प्रतिपद्यतेदुतितत्रम मीएणितिम २
मीयत्वचितः त्वचित्यर्थः प्राणोत्वायोनेति प्राणावायुत्त्यामेनत्वगिंद्रियेणेत्यर्थः वहुत्वयत्नोवेकायवायोतिर्दि
हः त्वगिरभि यत्तत्वेलोमानिलोमभिःओषधिवनस्पत्यइति २२ विवरणाएवंत्वेवलिखितं ॥२४॥ करुहस्तुर्नि
श्चिद्धोवलमिंद्रयंइंद्रोदेवतातदुभयाश्रयमादानंकर्म ॥२५॥ श्रमिकामुक्तीमभीष्टांविहिताेइत्यर्थः ॥पद्यांस
हयत्तोविष्णुरेवसत्वंतधिष्टातृरूपेणास्थितः कर्मभिर्विनिगत्याख्याकर्मशक्तिरिंद्रियमुक्तं हव्यंक्रियतेइति
गतिप्राप्यंयज्ञार्यंद्रव्यादिषयरक्रम ॥२५॥

६२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा टी
प्रियं २
२२

नृभिरिति व्यष्टिजीवेष्वपि इत्थमेव योनिविनि[illegible] दर्शयन्नप्यधिकारिनं यज्ञादीनां दर्शयति ॥ प्रजाश्रयपत्यमानंदो रतिः प्र
मृतं स्वर्गादि तदर्थिनः शिश्नाधिष्ठानं उपस्थेंद्रियं प्रजापतिरश्वासीदिति ज्ञेयं ॥ तदुभयाश्रयं कामानंदस्त्रीसंभोगानां संवे
धिना ॥ २८ ॥ धातुमले भुक्तान्नादीनां प्रसारो शल्यक्रासिद्धं नः गुदं पायुसंज्ञोत्सर्गाश्रयधिष्ठानेंद्रियदेवताविषयाः
२९ ॥ पूर्वोदेहान् पृथग्देहान्तुप्राणिस्वासि सृष्टेः सर्वतो गात्रं तु मिक्षोर्निरभिद्यतेन पानुषंगः अपानतः अपगच्छतः पृथक्
तमवलोनाभ्यादीन्यधिष्ठानादीनि नाभ्यादिप्राणापानयोः वेधविश्लेषेण मृत्युरिति प्रसिद्धं ॥ २८ ॥ अन्नपानानामादि

निरभिद्यन्नाभिस्तां विष्णजानंदामृतार्थिनः ॥ उपस्थस्यासीत्कामानां प्रियं तदुभयाश्रयं ॥ २८ ॥ उत्सिसृक्षोर्धातु
मलैर्निरभिद्यत वैगुदं ॥ ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः ॥ २९ ॥ असिसृक्षोः पुरः पुर्यां नाभिद्वारमपान ३२
तः ॥ तत्रापानस्ततो मृ[illegible]त्युः पृथक्त्वमुभयाश्रयं २९
आदित्सोरन्नपानानामासन् कुक्ष्यन्त्रनाडयः नद्यः समुद्राश्च तयोः तुष्टिः पुष्टिः तदाश्रये ॥ ३१ ॥ निदिध्या
सोरात्ममायां हृदयं निरभिद्यत ॥ ततो मनस्ततश्चंद्रः संकल्पः काम एव च ॥ ३० ॥ ॥

समुद्रा २
त्सोः संग्रहीतुमिच्छोः कुक्षिरस्यंत्राणि च नाडयः स्रास न नदकुक्षिरधिष्ठानं [illegible] अन्नादेरन्नसंग्रहेकरणमिंद्रियस्था
नीयं ॥ नाडयस्तु पानसंगृहीतयोर्नाडीत्रवर्गो [illegible] मेणान यद्वदेवते तुष्टिपुष्टि स्वसपरिणामनतः स्वेतदा॥
श्रयेन तदुभयनिमित्तेन नाडीसंगृहेच्छोः कुक्ष्यंत्रसमुद्रनुष्टयपेयसंग्रहेच्छोः कुक्षिनाडीनदीपुष्टय इति विवेकः २९
निदिध्यासोर्नितरां चिंतयितुमिच्छोः कामोभिलाषो हृदयं मनः चंद्रसंकल्पाश्रयाधिष्ठानादयः तदेवमधिदेवादिभेदे
विभज्यात्मानं देशभूतानां ध्यानादीनां स्वरूपमाह त्वगिति द्वाभ्यां ॥ ३१ ॥ ॥

मि २
इति चतुष्टयं
३२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्वक्स्थूलं चर्मतदुपरिस्थितं सूक्ष्मं तत्र गात्रयोरैक्यं तनाः द्वंद्वैकवद्भावेन निर्दिष्टाः सप्त ये धातवस्ते भूम्यप्तेजोमयाः तेषां
च पंचभौतिकत्वेपि वायोः प्राणो वाह्याकाशादि रूपेण संबंधिकत्वाभावादेवमुक्तं ॥ २३ ॥ गुणात्मकानि गुणो शब्दादिस्तद्ग्रा
त्मायेषां विषयाभिमुखस्वभावानीत्यर्थः गुणाः शब्दादयः तामसाहंकारः भूतादिः ततः प्रकर्षेण भवंती
ति तथाहंकारकार्यत्वं शोभनस्वभावाः नवस्ततः तत्त्वेनार्थः अत्रहेतुः यतो मन एव सर्वविकाराणामात्मा
स्वरूपं बुद्धिस्तु तथाविधार्थविज्ञानरूपिणी नतु परमार्थग्राहिणीति वैराग्यार्थमुक्तं अनेनैव बुद्धिमतां सोः

दृ
त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधातवः ॥ भूम्यप्तेजोमयाः सप्त प्राणो व्योमांबुवायुभिः ॥ २३ ॥ गुणा
त्मकानींद्रियाणि भूतादिप्रभवा गुणाः ॥ मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी ॥ २४ ॥ एत
द्भगवतो रूपं स्थूलं ते व्याहृतं मया ॥ मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतं ॥ २५ ॥ अतः परं
सूक्ष्मतममव्यक्तं निर्विशेषणं ॥ अनादिमध्यनिधनं नित्यं वाङ्मनसः परं ॥ रूप
अमुनी भगवद्रूपे मया ते ह्यनुवर्णिते ॥ उभे अपि न गृह्णन्ति मायासृष्टे
विपश्चितः ॥ २७ ॥ नमः यतो निर्विशेषणं २

स्वरूपमुक्तमुपसंहरति ॥ एतदिति २५ प्रकृत्या महदादिभिः सह सप्तभिः सूक्ष्मं समष्टिलिंगशरीरमा
ह २६ अतः परमस्य स्थूलस्य कारणभूतं सूक्ष्मममतींद्रियं यत्तदव्यक्तं ननु कुतः अनादिमध्यनिध
नं उत्पत्तिस्थितिलयशून्यं नित्यं सदेकरूपं अत एव वाङ्मनसयोरगोचरमित्यर्थः ॥ अत एव वाङ्मनसयोर्द्वंद्वैक्यं ॥ तस्मा
त्स्वरूपमुपास्यं नार्थं भगवत्या रोपितं रूपद्वयमप्यवदति अमुनी इति ॥ २७ ॥ न गृह्णन्ति नाङ्गीकुर्वंति वस्तुतः स्व
तो मायाया रूपगुणकर्मकं उक्तं भगवता ब्रह्माणं प्रति तत्प्रपंचयितुं ब्रह्मादिरूपाणि तत्कर्माणि चास

सृष्टे ॥

श्री भा टी २४

इत्यंभावेनेत्याह तः स्त्रोकेनैनयेन स भगवान्ब्रह्मरूपधृक्तन वाच्यवाचकतया नामानि वाच्यतया रूपाणि क्रियाः।
अर्थधत्ते सृजतीत्यर्थः। मायया सकर्मा स्वरूपेण वस्तुतस्त्वकर्मकः। एतत्प्रपंचयति प्रजापतीनिति सार्धैस्त्रिभिः २०
द्वितीयांतानां धत्ते इत्यनेनान्वयः ततः प्रजापत्यादीनि नामानि तद्व्यक्तिरूपाणि तत्कर्माणि च द्रष्टव्यानि पृथक्कृतत्तद्वा
नरभेदेन ॥१८॥ गिरीनित्यस्यानंतरं नृपेति संबोधनं ॥१९॥ किन्नरादयः खगादयश्चेति ॥२०॥ द्विविधाः स्थावरजंगमरू कूष्मांडादयः ५
पेण चतुर्विधाः जरायुजांडजस्वेदजोद्भिज्जरूपेण जलस्थलनभांसि ओकांसि येषां ते नानायत्त्रेरूपेण इति सर्वेणैव

स वाच्यवाचकतया भगवान्ब्रह्मरूपधृक्। नामरूपक्रियाधत्ते सकर्माकर्मकः परः ॥१७॥ प्रजापतीन्म
नून्देवानृषीन्पितृगणान्पृथक्। सिद्धचारणगन्धर्वान्विद्याध्रान्सुरगुह्यकान् ॥१८॥ किन्नराप्सरसो
नागान्सर्पान्किंपुरुषोरगान्। मातृरक्षःपिशाचांश्च प्रेतभूतविनायकान् ॥१९॥ कूष्मांडोन्मादवेताला ५२
न्यातुधानान्ग्रहानपि। खगान्मृगान्पशून्वृक्षान्गिरीन्नृप सरीसृपान् ॥२०॥ द्विविधाश्चतुर्विधा येऽन्ये जल
स्थलनभौकसः। कुशलाकुशला मिश्राः कर्मणां गतयस्त्विमाः ॥२१॥ सत्त्वं रजस्तम इति तिस्रः सुरनृ
नारकाः। तत्राप्येकैकशो राजन्भिद्यन्ते
गतयस्त्रिधा ॥२२॥ यदैकैकतरोऽन्याभ्यां स्वभाव उपहन्यते ॥

त्वयः सत्त्वराजसतामसभेदेन यावत्यः कर्मगतयो यादृशीः द्विजसत्तमेति तस्यापि प्रसंगादनेनैवान्तरमाह कुशलाकुशला उत्तमाधमकुशला
मिश्राः निषिद्धानां मिश्रा मध्यमाः कर्मणां गतयः फलानि ॥२१॥ सत्त्वादिभेदेन कर्मगतीर्वैविध्यं प्रपंचयति
सत्त्वमिति ॥ सत्त्वादयः तिस्रो गतयः सुरादिरूपाः तत्रापि एकैकस्याः सुरादिरूपायाः गतेस्त्रैधं ॥२२॥ अन्याभ्यां गुणाभ्यां स्व
भावो गुण उपहन्यते अभिभूयते ॥ बहुरूपेण कालकर्माह ॥२३॥ ॥ ॥ ॥ ॥ २४

गुणप्रधानं पुंमिश्रमाणां ३ ॥ स एव त्वत्कृतो विश्वरूपेण

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सएवभगवान्स्थितिप्रयोजनभूतोवैरिविर्यस्थापयन्पालयन्धर्मरूपेणपुष्णातिमोषैःसंवर्धयति रुद्ररूपेणसंहर्तृत्वमाह॥४३॥त
तस्तत्वान्मनःसकाशाद्यदिदंसृष्टंतत्संनियच्छतिसंहरति कर्तृत्वायपवादेनदशमसमस्यशुद्धिमाह॥४४॥इत्थंभावेन स्व
रूपादिरूपेणानस्माद्वायतस्माद्वात्मनआकाशःसंभूतःसोकामयतवहुस्यां प्रजायेयेत्यादिश्रुत्यर्थकथितःसूरयस्तु
परेकेवलंस्वरूपेणैवद्रष्टुमर्हन्ति॥४६॥ नन्वकिमतःस्यात्किमिवजन्मादौकर्मणिपरस्येत्थंभावःकर्तृत्वंनास्तिइत्यु
त्यापितात्पर्यं नप्रतिपाद्यतेकिंतुप्रत्युतविधीयतेनयत्र तत्किमर्थंकर्तृत्वप्रतिषेधार्थं हिप्रतोमाययानादारोपितं।
प्रकारं नयावप्रकारैःनिष्कलंनिष्क्रियंशान्तंनिरवद्यंनिरंजनं इत्यादिश्रुतिभिःप्रत्युतप्रतिपत्तेनेत्याशयः॥४७॥उक्तमर्थमुपसंह

स एवेदं जगद्धाता भगवान्धर्मरूपधृक्॥ पुष्णाति स्थापयन्विश्वं तिर्यङ्नरसुरात्मभिः॥४४॥ ततः कालाग्निरुद्रा
त्मा यत्सृष्टमिदमात्मनः। संनियच्छति कालेन घनानीकमिवानिलः॥४५॥ इत्थंभावेन कथितो भगवान्भगव
त्तमः। नेत्थंभावेन हि परं द्रष्टुमर्हन्ति सूरयः॥४६॥
नास्य कर्मणि जन्मादौ परस्यानुविधीयते। कर्तृत्वप्रतिषेधार्थं माययारोपितं हि तत्॥४७॥ अयं तु
ब्रह्मणः कल्पः सविकल्प उदाहृतः। विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः॥४८॥ परिमाणं च कालस्य क
ल्पलक्षणविग्रहं। यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो शृणु॥४९॥

रतिअयंतु विविब्रह्मणःसंबंधीकल्पोमहाकल्पो विकल्पोवान्तरः तत्सहितउदाहृतःउदाहरणत्वेनसंक्षेपतउक्तः
कथंभूतःयत्रमहाकल्पेप्राकृताःमहदादिसर्गाः स्थावरादिसर्गाइत्यर्थःविधिःप्रकारोयत्रमहाकल्पादिभिःसाधार
॥४८॥कल्पमाणविस्तारंप्रतिजानीतेपरीतिपरिमाणंमन्वन्तरकल्पस्यलक्षणंरूपंतेनवेरूपश्चनितद्विग्रहमवा
न्तर कल्पमन्वन्तरादिरूपविभागंवयथावद्विस्तारेणपुरस्तात् तृतीयस्कंधेवक्ष्यामिसंप्रतिपाद्मंकल्पमथोइतिका
र्त्स्न्येनव्याख्याविधिमात्रेणशृणु यदर्थंस्वसृष्टिदिनिरूपणेनतदेवसाक्षात्॥ श्रोतुकामःकथानन्दस्वच्छंग्रति॥४९॥।

अवांतरकल्पेचवैकृताः ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

संबंधीतितत्रीर्थानियद्बाः

श्री भा द्वि टी ५

यदाहेति गुवंः ते ज्ञाणिवेति ॥ ५ ॥ कौषारवेर्मैत्रेयस्यतस्यतत्तुश्च श्रव्याम्भंतात्तंसंश्रितः संवादः ॥ ५१ ॥ पुनरागतवान्त
दवनिमित्तंद्व द्वि ॥ ५२ ॥ राज्ञापृष्टस्यार्थः यद्यपृष्ठय दः दमेवराज्ञापिपृष्टवान् पुकौपिविदुरमैत्रेय।

शौनकउवाच ॥ यदाहभगवान्सूतत्तनाभागवतोत्तमः चचारतीर्थानिभु
वः त्यक्त्वाबंधूनसुदुस्त्यजान् ॥ ५० ॥ कुत्रकौषारवेस्तस्यसंवादोध्यात्मसंश्रितः
यद्वासभगवांस्तस्मैपृष्टस्तत्वमुवाचह ॥ ५१ ॥ ब्रूहिनस्तदिदंसौम्यविदुरस्य
विचेष्टितं ॥ बंधुत्यागनिमित्तंचतथैवागतवान्पु
नः ॥ ५२ ॥ सूतउवाच ॥ राज्ञापरीक्षितापृष्टोयद
वोचन्महामुनिः तद्वोभिधास्येशृणुतरा
ज्ञः प्रश्नानुसारतः ॥ ५३ ॥ इतिश्रीभा
गवतेद्वितीयस्कंधेदश
मोध्यायः ॥ समाप्तोयं द्वितीयस्कंधः

संवादंप्रवक्तुमन्वयेपूर्वराज्ञाकृताः प्रश्नाः तदनुसारेणसर्वंपुराणार्थमवोचत् तदेवाहंवोभिधास्यामितयेवशृण
तेति ॥ ५३ ॥ इतिश्रीभावार्थदीपिकायांद्वितीयस्कंधेदशमोध्यायः ॥ १० ॥ द्वितीयस्कंधःसमाप्तः ॥ २ ॥

श्रीमद्भागवतंयेनस्वब्रह्मणामुखतोदितम् ब्रह्मनारदयोःप्रोक्तंतंवंदेगुरुमीश्वरम् । यत्सूत्रयंत्रितंविश्वंनरीनर्त्तिज
गत्त्रयंहंतमत्तमेवदृष्टंप्रनुयदत्रस्खलितंममर २ द्वितीयस्कंधसंवंधिपदभावार्थदीपिका उद्दीप्यतामिमंस-

द्विधियाख्यातत्वदीपिका २ इच्छत्वाभिछयासंतः क्षमतांममसाहसम्
मयाक्लिस्वीयबोधायकृतमेतन्नसर्वतः ४ ॥ १ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्वितीयसमाप्तिः २

A. no. 16

~~A. no. 14~~

१६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative